


Shri Raghunatha Temple MSS. Library,
JAMMU

No. १३१ घ

Title अष्टाध्यायी सूत्र पाठ:

Author महर्षि पाणिनि:

Extent ७२ पत्र Age

Subject व्याकरण


अष्टाध्यायीसूत्रपाठः

६२ पन्नानि

१३१

॥ अथसूत्रपाठप्रारंभः॥ श्लो १०००







सू॰ पा॰ १ श्रीगणेशाय नमः ॥ ॥ हरिः ॐ ३ ॥ ॥ येनाक्षरसमाम्नायमधिगम्यम
हेश्वरात् ॥ कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ येन धौता गिरः
१ पुंसां विमलैः शब्दवारिभिः ॥ तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥
अइउण् ॥ ऋऌक् । एओङ् । ऐऔच् ॥ हयवरट् ॥ लण् ॥ ञमङणनम् ॥
झभञ् ॥ घढधष् ॥ जबगडदश् ॥ खफछठथचटतव् ॥ कपय् ॥ शषस
र् ॥ हल् ॥ इति प्रत्याहारसूत्राणि ॥ ॥ वृद्धिरादैच् ॥ अदेङ् गुणः ॥ इकोगु
णवृद्धी ॥ न धातुलोप आर्धधातुके ॥ क्ङिति च ॥ दीधीवेवीटां ॥ हलोनंतराः १
संयोगः ॥ मुखनासिकावचनोनुनासिकः ॥ तुल्यास्यप्रयत्नं सवर्णं ॥
नाज्झलौ ॥ ईदूदेद्द्विवचनं प्रगृह्यं ॥ अदसो मात् ॥ शे । निपात एकाजनाः

ह्र॥ ओत्॥ संबुद्धौ शाकल्यस्येतावनार्षे॥ उञः॥ ऊं॥ ईदूतौ च सप्तम्य
र्थे॥ दाधाघ्वदाप्॥ १॥ आद्यंतवदेकस्मिन्॥ तरप्तमपौ घः॥ बहुगण
वतुडति संख्या॥ ष्णांता षट्॥ डति च॥ क्तक्तवतू निष्ठा॥ सर्वादीनि सर्वना
मानि॥ विभाषा दिक्समासे बहुव्रीहौ॥ न बहुव्रीहौ॥ तृतीयासमासे॥
द्वंद्वे च॥ विभाषा जसि॥ प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च॥ पू
र्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां॥ स्वमज्ञातिधना
ख्यायां॥ अंतरं बहिर्योगोपसंव्यानयोः॥ स्वरादिनिपातमव्ययं॥ त
द्धितश्चासर्वविभक्तिः॥ कृन्मेजंतः॥ क्त्वातोसुन्कसुनः॥ २॥ अव्य
यीभावश्च॥ शि सर्वनामस्थानं॥ सुडनपुंसकस्य॥ न वेति विभाषा॥

सू॰पा॰१ इग्यणः संप्रसारणं॥ आद्यंतौ टकितौ॥ मिदचोंत्यात्परः॥ एच इग्घ्रस्वा
२ देशे॥ षष्ठी स्थानेयोगा॥ षष्ठी स्थानेयोगा॥ स्थानेंतरतमः॥ उरण्रपरः॥
2 अलोंत्यस्य॥ ङिच्च॥ आदेः परस्य॥ अनेकाल्शित्सर्वस्य॥ स्थानिवदा
देशोनल्विधौ॥ अचः परस्मिन्पूर्वविधौ॥ नपदांतद्विर्वचनवरेयलो
पस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु॥ द्विर्वचनेचि॥ अदर्शनं लो
पः॥ ३॥ प्रत्ययस्य लुक्श्लुलुपः॥ प्रत्ययलोपे प्रत्ययलक्षणं॥ न लु
मतांगस्य॥ अचोंत्यादि टि॥ अलोंत्यात्पूर्व उपधा॥ तस्मिन्निति
निर्दिष्टे पूर्वस्य॥ तस्मादित्युत्तरस्य॥ स्वं रूपं शब्दस्याशब्दसंज्ञा॥ २
अणुदित्सवर्णस्यचाप्रत्ययः॥ तपरस्तत्कालस्य॥ आदिरंत्येनस

हेता। येन विधिस्तदंतस्य॥ वृद्धिर्यस्याचामादिस्तद्वृद्धं॥ त्यदादीनि च॥
एङ् प्राचां देशे॥ ४॥ ॥ वृद्धिराद्यंतवदव्ययीभावः प्रत्ययस्य लुक्पंचदश॥
॥ ॥ इति प्रथमाध्यायस्य प्रथमः पादः॥ ॥ गाङ्कुटादिभ्योऽञ्णिन्ङित्॥
विज इट्॥ विभाषोर्णोः॥ सार्वधातुकमपित्॥ असंयोगाल्लिट्कित्॥
इंधिभवतिभ्यां च॥ मृडमृदगुधकुषक्लिशवदवसः क्त्वा॥ रुदविदमु
षग्रहिस्वपिप्रच्छः संश्च॥ इको झल्॥ हलंताच्च॥ लिङ्सिचावात्मनेप
देषु॥ उश्च॥ वा गमः॥ हनः सिच्॥ यमो गंधने॥ विभाषोपयमने॥ स्था
घ्वोरिच्च॥ न क्त्वा सेट्॥ निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः॥ मृषस्ति
तिक्षायां॥ १॥ उदुपधाद्भावादिकर्मणोरन्यतरस्यां॥ पूङः क्त्वा च॥ नो

सू॰पा॰१ पधात्थफांताद्वा॥ वंचिलुंच्यृतश्च॥ तृषिमृषिकृषेः काश्यपस्य॥ रलोव्यु
पधाद्धलादेः संश्च॥ ऊकालोऽज्झस्वदीर्घप्लुतः॥ अचश्च॥ उच्चैरुदा
२ त्तः॥ नीचैरनुदात्तः॥ समाहारः स्वरितः॥ तस्यादितउदात्तमर्धह्रस्वं॥ ए
3 कश्रुतिदूरात्संबुद्धौ॥ यज्ञकर्मण्यजपन्यूंखसामसु॥ उच्चैस्तरांवाव
षट्कारः॥ विभाषाछंदसि॥ नसुब्रह्मण्यायांस्वरितस्यतूदात्तः॥ देवब्र
ह्मणोरनुदात्तः॥ स्वरितात्संहितायामनुदात्तानां॥ उदात्तस्वरितपरस्य
संनतरः॥२॥ अपृक्तएकाल्प्रत्ययः॥ तत्पुरुषः समानाधिकरणः क
र्मधारयः॥ प्रथमानिर्दिष्टंसमास उपसर्जनं॥ एकविभक्तिचापू ३
र्वनिपाते॥ अर्थवदधातुरप्रत्ययः प्रातिपदिकं॥ कृत्तद्धितसमासा

श्च॥ ह्रस्वो नपुंसके प्रातिपदिकस्य॥ गोस्त्रियोरुपसर्जनस्य॥ लुक्तद्धि
तलुकि॥ इद्गोण्याः॥ लुपियुक्तवद्व्यक्तिवचने॥ विशेषणानांचाजातेः॥
तदशिष्यंसंज्ञाप्रमाणत्वात्॥ लुब्योगाप्रख्यानात्॥ योगप्रमाणेचत
दभावेदर्शनंस्यात्॥ प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्॥
कालोपसर्जनेचतुल्यं॥ जात्याख्यायामेकस्मिन्बहुवचनमन्यतर
स्यां॥ अस्मदोद्वयोश्च॥ फल्गुनीप्रोष्ठपदानांचनक्षत्रे॥ ३॥ छंदसिपु
नर्वस्वोरेकवचनं॥ विशाखयोश्च॥ तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वेबहुव
चनस्यद्विवचनंनित्यं॥ सरूपाणामेकशेषएकविभक्तौ॥ वृद्धोयू
नातल्लक्षणश्चेदेवविशेषः॥ स्त्रीपुंवच्च॥ पुमान्स्त्रिया॥ भ्रातृपु

स्व॰पा॰१ त्रौस्वस्र दुहितृभ्यां॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां॥ पितामा

त्रा॥ श्वशुरः श्वश्र्वा॥ त्यदादीनि सर्वैर्नित्यं॥ ग्राम्यपशुसंघेष्वतरुणे

४ षु स्त्री॥ ४॥ ॥गा॰१ कुटाद्युडुपधाद्यक्तश्छंदसिपुनर्वस्वोस्त्रयोदश॥

५ ॥ ॥इति प्रथमाध्यायस्य द्वितीयः पादः॥ ॥भूवादयो धातवः॥ उपदेशे

जनुनासिक इत्॥ हलंत्यं॥ नविभक्तौ तुस्माः॥ आदिर्ञिटुडवः॥ षः प्र

त्ययस्य॥ चुटू॥ लशक्वतद्धिते॥ तस्य लोपः॥ यथासंख्यमनुदेशः

समानां॥ स्वरितेनाधिकारः॥ अनुदात्तङितआत्मनेपदं॥ भावक ४

र्मणोः॥ कर्त्तरि कर्मव्यतिहारे॥ नगतिहिंसार्थेभ्यः॥ इतरेतरान्यो

न्योपपदाच्च॥ नेर्विशः॥ परिव्यवेभ्यः क्रियः॥ विपराभ्यांजेः॥ आ

ङोदोनास्यविहरणे ॥१॥ क्रीडोनुसंपरिभ्यश्च ॥ समवप्रविभ्यः स्थः ॥ प्रका
शनस्थेयाख्ययोश्च ॥ उदोनूर्ध्वकर्मणि ॥ उपान्मंत्रकरणे ॥ अकर्मकाच्च ॥
उद्विभ्यांतपः ॥ आङोयमहनः ॥ समोगम्यृछिप्रछिस्वरत्यर्त्तिश्रुविदिभ्यः ॥
निसमुपविभ्योह्वः ॥ स्पर्धायामाङः ॥ गंधनावक्षेपणसेवनसाहसि
क्यप्रतियत्नप्रकथनोपयोगेषुकृञः ॥ अधेः प्रसहने ॥ वेः शब्दकर्मणः
अकर्मकाच्च ॥ संमाननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्य
येषुनियः ॥ कर्त्तृस्थेचाशरीरेकर्मणि ॥ वृत्तिसर्गतायनेषुक्रमः ॥
उपपराभ्यां ॥ आङ उद्गमने ॥२॥ वेः पादविहरणे ॥ प्रोपाभ्यांसम
र्थाभ्यां ॥ अनुपसर्गाद्वा ॥ अपह्नवेज्ञः ॥ अकर्मकाच्च ॥ संप्रतिभ्या

सू·पा·१ मनाध्याने॥ भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः॥ व्य
५ क्तवाचां समुच्चारणे॥ अनोरकर्मकात्॥ विभाषाविप्रलापे॥ अवाद्ग्रः॥
समः प्रतिज्ञाने॥ उदश्चरः सकर्मकात्॥ समस्तृतीयायुक्तात्॥ दाणश्च सा
5 चेच्चतुर्थ्यर्थे॥ उपाद्यमः स्वकरणे॥ ज्ञाश्रुस्मृदृशां सनः॥ नानोर्ज्ञः॥ प्र
त्याङ्भ्यां श्रुवः॥ शदेः शितः॥ ३॥ म्रियतेर्लुङ्लिङोश्च॥ पूर्ववत्सनः॥ आ
म्प्रत्ययवत्कृञोनुप्रयोगस्य॥ प्रोपाभ्यां युजेरयज्ञपात्रेषु॥ समः क्ष्णु
वः॥ भुजोनवने॥ णेरणौयत्कर्मणौचेत्सकर्त्तानाध्याने॥ भीस्म्यो ५
र्हेतुभये॥ गृधिवंच्योः प्रलंभने॥ लियः संमाननशालीनीकरण
योश्च॥ मिथ्योपपदात्कृञोभ्यासे॥ स्वरितञितः कर्त्रभिप्राये क्रि

याफले॥ अपाद्वदः॥ णिचश्च॥ समुदाङ्भ्यो यमोग्रंथे॥ अनुपसर्गात्ज्ञः॥
विभाषोपपदेनप्रतीयमाने॥ शेषात्कर्त्तरिपरस्मैपदं॥ अनुपराभ्यां
कृञः॥ अभिप्रत्यतिभ्यः क्षिपः॥ ४॥ प्राद्वहः॥ परेर्मृषः॥ व्याङ्परिभ्यो
रमः॥ उपाच्च॥ विभाषाकर्मकात्॥ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः॥
निगरणचलनार्थेभ्यश्च॥ अणावकर्मकाच्चित्तवत्कर्तृकात्॥ न
पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः॥ वा क्यषः॥ द्युद्भ्यो
लुङि॥ वृद्भ्यः स्यसनोः॥ लुटिचक्लृपः॥ ५॥ ॥ भूवादयः क्रीडोनुवेःपा
दम्रियतेः प्राद्वहस्त्रयोदश॥ ॥ इतिप्रथमाध्यायस्यतृतीयःपादः॥
आकडारादेकासंज्ञा॥ विप्रतिषेधेपरंकार्यं॥ यूस्त्र्याख्यौनदी॥ नेय

सू.पा.१ ङुवङ्स्थानावस्त्री॥ वामि॥ ङिति ह्रस्वश्च॥ शेषो घ्यसखि॥ पतिः समा
सएव॥ षष्ठीयुक्तश्छंदसि वा॥ ह्रस्वं लघु॥ संयोगे गुरु॥ दीर्घं च॥ य
६ स्मात्प्रत्ययविधिस्तदादि प्रत्ययेंगं॥ सुप्तिङंतं पदं॥ नः क्ये॥ सिति च॥
6 स्वादिष्वसर्वनामस्थाने॥ यचि भं॥ तसौ मत्वर्थे॥ अयस्मयादीनि छंद
सि॥ १॥ बहुषु बहुवचनं॥ द्व्येकयोर्द्विवचनैकवचने॥ कारके॥ ध्रुव
मपायेपादानं॥ भीत्रार्थानां भयहेतुः॥ पराजेरसोढः॥ वारणार्था
नामीप्सितः॥ अंतर्धौ येनादर्शनमिच्छति॥ आख्यातोपयोगे॥ जनि छ ६
कर्तुः प्रकृतिः॥ भुवः प्रभवः॥ कर्मणा यमभिप्रैति स संप्रदानं॥ रु
च्यर्थानां प्रीयमाणः॥ श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः॥ धारेरु

त्तमर्णः॥स्पृहेरीप्सितः॥ क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिकोपः॥ क्रुधद्रु
हेर्ष्यासूयार्थानांयंप्रतिकोपः॥ क्रुधद्रुहोरुपसृष्टयोः कर्म॥ राधीक्ष्यो
र्यस्यविप्रश्नः॥ प्रत्याङ्भ्यांश्रुवः पूर्वस्यकर्त्ता॥२॥अनुप्रतिगृणश्च॥
साधकतमंकरणं॥दिवः कर्मच॥ परिक्रयणे संप्रदानमन्यतरस्यां॥ आ
धारोधिकरणं॥ अधिशीङ्स्थासांकर्म॥ अभिनिविशश्च॥ उपान्वध्या
ङ्वसः॥ कर्तुरीप्सिततमं कर्म॥तथायुक्तंचानीप्सितं॥अकथितंच॥ ग
तिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्तासणौ॥हृक्रोर
न्यतरस्यां॥स्वतंत्रः कर्त्ता॥ तत्प्रयोजकोहेतुश्च॥ प्राग्रीश्वरान्निपा
ताः॥चादयोसत्वे॥ प्रादयः॥ उपसर्गाः क्रियायोगे॥ गतिश्च॥३॥ऊर्यी

सू॰पा॰१ द्विच्विडाचश्च॥ अनुकरणंचानितिपरं॥ आदरानादरयोःसदसती॥
भूषणेलं॥ अंतरपरिग्रहे॥ कणेमनसीश्रद्धाप्रतीघाते॥ पुरोव्ययं॥ अस्तंच॥
७ अच्छगत्यर्थवदेषु॥ अदोनुपदेशे॥ तिरोंतर्धौ॥ विभाषाकृञि॥ उपा
7 जेन्वाजे॥ साक्षात्प्रभृतीनिच॥ अनत्याधानउरसिमनसी॥ मध्ये
पदेनिवचनेच॥ नित्यंहस्तेपाणावुपयमने॥ प्राध्वंबंधने॥ जीविको
पनिषदावौपम्ये॥ तेप्राग्धातोः॥ ४॥ छंदसिपरेपि॥ व्यवहिताश्च॥ कर्म
प्रवचनीयाः॥ अनुर्लक्षणे॥ तृतीयार्थे॥ हीने॥ उपोधिकेच॥ अपपरी ७
वर्जने॥ आङ्मर्यादावचने॥ लक्षणेत्थंभूताख्यानभागवीप्सासु
प्रतिपर्यनवः॥ अभिरभागे॥ प्रतिः प्रतिनिधिप्रतिदानयोः॥ अधि

परीऽनर्थकौ॥ सुः पूजायां॥ अतिरतिक्रमणेच॥ अपिः पदार्थसंभा
वनान्ववसर्गगर्हासमुच्चयेषु॥ अधिरीश्वरे॥ विभाषाकृञि॥ लः प
रस्मैपदं॥ तङानावात्मनेपदं॥ ५॥ तिङस्त्रीणित्रीणिप्रथममध्यं
मोत्तमाः॥ तान्येकवचनद्विवचनबहुवचनान्येकशः॥ सुपः॥ वि
भक्तिश्च॥ युष्मद्युपपदे समानाधिकरणेस्थानिन्यपिमध्यमः॥ प्र
हासेचमन्योपपदे मन्यतेरुत्तमएकवच्च॥ अस्मद्युत्तमः॥ शेषेप्रथमः॥
परः संनिकर्षः संहिता॥ विरामोवसानं॥ ६॥ ॥ आकडाराद्बहुवनु
प्रतिग्रणाऊर्यादिछंदसितिङोदश॥ ॥ इतिप्रथमाध्यायस्यचतुर्थः
पादः॥ ॥ इतिप्रथमोऽध्यायः समाप्तः॥ ॥ हरिः ॐ ३॥ ॥ समर्थः

स.पा.२ पदविधिः॥ सुबामंत्रितेपरांगवत्स्वरे॥ प्राक्कडारात्समासः॥ सहसुपा॥
८ अव्ययीभावः॥ अव्ययंविभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्यया
संप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसा
४ कल्यांतवचनेषु॥ यथासादृश्ये॥ यावदवधारणे॥ सुप्प्रतिनामा
त्रार्थे॥ अक्षशलाकासंख्याः परिणा॥ विभाषा॥ अपपरिबहिरं
चवः पंचम्या॥ आङ्मर्यादाभिविध्योः॥ लक्षणेनाभिप्रतीआभि
मुख्ये॥ अनुर्यत्समया॥ यस्यचायामः॥ तिष्ठद्गुप्रभृतीनिच॥ पा ८
रेमध्येषष्ठ्यावा॥ संख्यावंश्येन॥ नदीभिश्च॥ १॥ अन्यपदार्थे
चसंज्ञायां॥ तत्पुरुषः॥ द्विगुश्च॥ द्वितीयाश्रितातीतपतितगता

त्यस्तप्राप्तापन्नैः॥ स्वयंक्तेन॥ खट्वाक्षेपे॥ सामि॥ कालाः॥ अत्यंतसं
योगेच॥ तृतीयातत्कृतार्थेन गुणवचनेन॥ पूर्वसदृशसमोनार्थक
लहनिपुणमिश्रश्लक्ष्णैः॥कर्तृकरणेकृताबहुलं॥ कृत्यैरधिकार्थव
चने॥ अन्नेनव्यंजनं॥ भक्ष्येणमिश्रीकरणं॥ चतुर्थीतदर्थार्थबलि
हितसुखरक्षितैः॥ पंचमीभयेन॥ अपेतापोढमुक्तपतितापत्रस्तैरल्प
शः॥ स्तोकांतिकदूरार्थकृछ्राणिक्तेन॥ सप्तमीशौंडैः॥२॥ सिद्धशुष्क
पक्वबंधैश्च॥ ध्वांक्षेणक्षेपे॥ कृत्यैरृणे॥ संज्ञायां॥ क्तेनाहोरात्रावय
वाः॥ तत्र॥ क्षेपे॥ पात्रेसंमितादयश्च॥ पूर्वकालैकसर्वजरत्पुराणन
वकेवलाः समानाधिकरणेन॥ दिक्संख्ये संज्ञायां॥ तद्धितार्थोत्तरप

सू·पा·२ द्समाहारे च॥ संख्यापूर्वो द्विगुः॥ कुत्सितानि कुत्सनैः॥ पापाणके कुत्सि
तैः॥ उपमानानि सामान्यवचनैः॥ उपमितं व्याघ्रादिभिः सामान्याप्र
१. योगे॥ विशेषणं विशेष्येण बहुलं॥ पूर्वापरप्रथमचरमजघन्यसमा
नमध्यममध्यमवीराश्च॥ श्रेण्यादयः कृतादिभिः॥ क्तेन नञ्विशि
9 ष्टेनानञ्॥ ३॥ सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः॥ वृंदारकनाग
कुंजरैः पूज्यमानं॥ कतरकतमौ जातिपरिप्रश्ने॥ किं क्षेपे॥ पोटायु
वतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रि १
याध्यापकधूर्त्तैर्जातिः॥ प्रशंसावचनैश्च॥ युवाखलतिपलितव
लिनजरतीभिः॥ कृत्यतुल्याख्या अजात्या॥ वर्णो वर्णेन॥ कु

मारश्रमणादिभिः॥ चतुष्पादो गर्भिण्या॥ मयूरव्यंसकाद्यश्च॥ ४॥
॥ ॥ समर्थो न्यपदार्थे सिद्धशुष्कसन्महद्वादश॥ ॥ इति द्वितीयाध्यायस्य
प्रथमः पादः॥ ॥ पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे॥ अर्धंन
पुंसकं॥ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां॥ प्राप्तापन्ने च द्विती
यया॥ कालाः परिमाणिना॥ नञ्॥ ईषदकृता॥ षष्ठी॥ याजकादिभि
श्च॥ न निर्धारणे॥ पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकर
णेन॥ क्तेन च पूजायां॥ अधिकरणवाचिना च॥ कर्मणि च॥ तृजका
भ्यां कर्तरि॥ कर्तरि च॥ नित्यं क्रीडाजीविकयोः॥ कुगतिप्रादयः॥
उपपदमतिङ्॥ अमैवाव्ययेन॥ १॥ तृतीयाप्रभृतीन्यन्यतरस्यां॥

सू॰पा॰२ त्का च ॥ शेषो बहुव्रीहिः ॥ अनेकमन्यपदार्थे ॥ संख्ययाव्ययासन्ना
दूराधिकसंख्याः संख्येये ॥ दिङ्नामान्यंतराले ॥ तत्र तेनेदमिति सरूपे ॥
१० तेन सहेति तुल्ययोगे ॥ चार्थे द्वंद्वः ॥ उपसर्जनं पूर्वं ॥ राजदंतादिषुप
10 रं ॥ द्वंद्वे घि ॥ अजाद्यदंतं ॥ अल्पाच्तरं ॥ सप्तमीविशेषणे बहुव्रीहौ ॥
निष्ठा ॥ वाहिताग्न्यादिषु ॥ कडाराः कर्मधारये ॥ २ ॥ ॥ पूर्वापराधरो
त्तरं तृतीयाप्रभृतीन्यष्टादश ॥ ॥ इति द्वितीयाध्यायस्य द्वितीयः पा
दः ॥ ॥ अनभिहिते ॥ कर्मणि द्वितीया ॥ तृतीया च होश्छंदसि ॥ अंत १०
रांतरेण युक्ते ॥ कालाध्वनोरत्यंतसंयोगे ॥ अपवर्गे तृतीया ॥ सप्त
मी पंचम्यो कारकमध्ये ॥ कर्मप्रवचनीययुक्ते द्वितीया ॥ यस्मा

दधिकंयस्यचेश्वरवचनंतत्रसप्तमी॥ पंचम्यपाङ्परिभिः॥ प्रतिनि
धिप्रतिदानेचयस्मात्॥ गत्यर्थकर्मणिद्वितीयाचतुर्थ्यौचेष्टायाम
नध्वनि॥ चतुर्थी संप्रदाने॥ क्रियार्थोपपदस्यचकर्मणिस्थानिनः॥
तुमर्थाच्चभाववचनात्॥ नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च॥
मन्यकर्मण्यनादरेविभाषाप्राणिषु॥ कर्तृकरणयोस्तृतीया॥
सहयुक्तेप्रधाने॥ येनांगविकारः॥ ३॥ इत्थंभूतलक्षणे॥ संज्ञोन्यत
रस्यांकर्मणि॥ हेतौ॥ अकर्त्तर्यृणेपंचमी॥ विभाषागुणेस्त्रियां॥ षष्ठीहे
तुप्रयोगे॥ सर्वनाम्नस्तृतीयाच॥ अपादानेपंचमी॥ अन्यारादितरर्ते
दिक्शब्दांचूत्तरपदाजाहियुक्ते॥ षष्ठ्यतसर्थप्रत्ययेन॥ एनपाद्वितीया॥

सू.पा.२ पृथग्विनानानाभिस्तृतीयान्यतरस्यां॥ करणेच स्तोकाल्पकृच्छ्रक
११ तिपयस्यासत्ववचनस्य॥ दूरांतिकार्थैः षष्ठ्यन्यतरस्यां॥ दूरांतिका
॥ र्थेभ्यो द्वितीयाच॥ सप्तम्यधिकरणेच॥ यस्यचभावेनभावलक्षणं॥
षष्ठीचानादरे॥ स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च॥
आयुक्तकुशलाभ्यां चासेवायां॥२॥ यतश्चनिर्धारणं॥ पंचमीवि
भक्ते॥ साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः॥ प्रसितोत्सुका
भ्यांतृतीयाच॥ नक्षत्रेचलुपि॥ प्रातिपदिकार्थलिंगपरिमा ११
णवचनमात्रेप्रथमा॥ संबोधनेच॥ सामंत्रितं॥ एकवचनंसं
बुद्धिः॥ षष्ठीशेषे॥ ज्ञोविदर्थस्यकरणे॥ अधीगर्थदयेशांकर्म

णि॥ कृत्रः प्रतियत्ने॥ रुजार्थानां भाववचनानामज्वरेः॥ आशिषि
नाथः॥ जासिनिप्रहणनाटक्राथपिषांहिंसायां॥ व्यवहृपणोः सम
र्थयोः॥ दिवस्तदर्थस्य॥ विभाषोपसर्गे॥ द्वितीया ब्राह्मणे॥३॥ प्रेष्य
ब्रुवोर्हविषोदेवतासंप्रदाने॥ चतुर्थ्यर्थे बहुलं छंदसि॥ यजेश्च करणे॥
कृत्वोर्थप्रयोगे कालेधिकरणे॥ कर्तृकर्मणोः कृति॥ उभयप्राप्तौ क
र्मणि॥ क्तस्य च वर्त्तमाने॥ अधिकरणवाचिनश्च॥ न लोकाव्ययनि
ष्ठाखलर्थतृनां॥ अकेनोर्भविष्यदाधमर्ण्ययोः॥ कृत्यानां कर्त्तरि वा॥
तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां॥ चतुर्थी चाशिष्यायुष्य
मद्रभद्रकुशलसुखार्थहितैः॥४॥ अनभिहित इत्यधिकृतयतश्च

स्व.पा.२ श्रेष्य भ्रुवो स्त्रयोः दृग्रा॥ ॥ इति द्वितीयाध्यायस्य तृतीयः पादः॥ ॥ द्विगुरे
१२ कवचनं॥ द्वंद्वश्च प्राणितूर्यसेनांगानां॥ अनुवादे चरणानां॥ अध्वर्यु
12 क्रतुरनपुंसकं॥ अध्ययनतो विप्रकृष्टाख्यानां॥ जातिरप्राणिनां॥ वि
शिष्टलिंगो नदी देशोग्रामाः॥ क्षुद्रजंतवः॥ येषांच विरोधः शाश्वतिकः॥
शूद्राणामनिरवसितानां॥ गवाश्वप्रभृतीनि च॥ विभाषा वृक्षमृगत
पशु पाधान्यव्यंजनैश्शकुन्यश्ववडवपूर्वापराधरोत्तराणां॥ विप्रतिषिद्धं
चानधिकरणवाचि॥ नदधिपय आदीनि॥ अधिकरणैतावत्वेच॥ वि १२
भाषा समीपे॥ स नपुंसकं॥ अव्ययीभावश्च॥ तत्पुरुषो नञ्कर्म
धारयः॥ संज्ञायां कंथोशीनरेषु॥ १॥ उपज्ञोपक्रमं तदाद्याचिख्यासा

यां॥ छायाबाहुल्ये॥ सभाराजामनुष्यपूर्वा॥ अशालाच॥ विभाषा
सेनासुराच्छायाशालानिशानां॥ परवल्लिंगंद्वंद्वतत्पुरुषयोः॥ पूर्ववि
दश्ववडवौ॥ हेमंतशिशिरावहोरात्रेच छंदसि॥ रात्राह्नाहाः पुंसि॥ अ
पथंनपुंसकं॥ अर्धर्चाः पुंसिच॥ इदमोन्वादेशेशनुदात्तस्तृतीया
दौ॥ एतदस्त्रतसोस्त्रतसौचानुदात्तौ॥ द्वितीयाटौस्स्वेनः॥ आर्धधा
तुके॥ अदोजग्धिर्ल्यप्तिकिति॥ लुङ्सनोर्घस्लृ॥ घञपोश्च॥ बहु
लं छंदसि॥ लिट्यन्यतरस्यां॥ २॥ वेञोवयिः॥ हनोवधलिङि॥ लुङि
च॥ आत्मनेपदेष्वन्यतरस्यां॥ इणो गालुङि॥ णौगमिरबोधने॥ सनि
च॥ इङश्च॥ गाङ् लिटि॥ विभाषालुङ्लृङोः॥ णौचसंश्चङोः॥ अ

सू॰पा॰२ स्तेर्भूः॥ ब्रुवो वचिः॥ चक्षिङः ख्याञ्॥ वा लिटि॥ अजेर्व्यघञपोः॥ वा
यौ॥ ण्यक्षत्रियार्षञितो यूनि लुगणिञोः॥ पैलादिभ्यश्च॥ इञः
१३ प्राचां॥ ३॥ न तौल्वलिभ्यः॥ तद्राजस्य बहुषु तेनैवास्त्रियां॥ यस्का
13 दिभ्यो गोत्रे॥ यञञोश्च॥ अत्रिभृगुकुत्सवसिष्ठगोतमांगिरोभ्य
श्च॥ बह्वच इञः प्राच्यभरतेषु॥ न गोपवनादिभ्यः॥ तिककित
वादिभ्यो द्वंद्वे॥ उपकादिभ्यो न्यतरस्यामद्वंद्वे॥ आगस्त्यकौंडि
न्ययोरगस्तिकुंडिनच्॥ सुपो धातुप्रातिपदिकयोः॥ अदिप्रभृति १३
भ्यः शपः॥ बहुलं छंदसि॥ यङोचि च॥ जुहोत्यादिभ्यः श्लुः॥ ब
हुलं छंदसि॥ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु॥ विभाषा

घ्राधेट्शाच्छासः॥ तनादिभ्यस्तथासोः॥ मंत्रेघसह्वरणशवृदहाद्वृ
च्कृगमिजनिभ्योलेः॥ ४॥ आमः॥ अव्ययादाप्सुपः॥ नाव्ययीभा
वादतोम्त्वपंचम्याः॥ तृतीयासप्तम्योर्बहुलं॥ लुटःप्रथमस्यडारौर
सः॥ ५॥ ॥ ह्विगुरुपज्ञोपक्रमंवेञोवयिर्नतौल्वलिभ्य आमः पंच॥ ॥
॥ ॥ इतिद्वितीयाध्यायस्यचतुर्थःपादः॥ ॥ इतिसूत्रपाठेद्वितीयोध्या
यः समाप्तः॥ ॥ हरिःॐ ३॥ ॥ प्रत्ययः॥ परश्च॥ आद्युदात्तश्च॥ अनु
दात्तौसुप्पितौ॥ गुप्तिज्किद्भ्यः सन्॥ मान्बधदान्शान्भ्योदीर्घ
श्चाभ्यासस्य॥ धातोः कर्मणः समानकर्तृकादिच्छायांवा॥ सुप आ
त्मनः क्यच्॥ काम्यच्च॥ उपमानादाचारे॥ कर्त्तुः क्यङ् सलोपश्च॥

सू॰पा॰३ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः॥ लोहितादिडाज्भ्यः क्यष्॥ कष्टाय

क्रमणे॥ कर्मणो रोमंथ तपोभ्यां वर्त्तिचरोः॥ बाष्पोष्मभ्यामुद्वमने॥ श

१४ ब्द वैर कलहाभ्र कण्व मेघेभ्यः करणे॥ सुखादिभ्यः कर्तृवेदनायां॥ न

मो वरिव श्चित्रङः क्यच्॥ पुछभांडचीवराण्णिङ्॥ १॥ मुंड मिश्र श्लक्ष्ण

लवण व्रत वस्त्र हल कल कृत तूस्तेभ्यो णिच्॥ धातोरेकाचो हलादेः

क्रियासमभिहारे यङ्॥ नित्यं कौटिल्ये गतौ॥ लुप सद चर जप जभ

दह दश गृभ्यो भावगर्हायां॥ सत्याप पाश रूप वीणा तूल श्लोक से १४

ना लोम त्वच वर्म वर्ण चूर्ण चुरादिभ्यो णिच्॥ हेतुमति च॥ कंड्वादि

भ्यो यक्॥ गुपू धूप विच्छि पणि पनिभ्य आयः॥ ऋतेरीयङ्॥ क

मेर्णिङ्॥ आयादय आर्धधातुके वा॥ सनाद्यंता धातवः॥ स्यतासी लृ
लुटोः॥ सिब्बहुलं लेटि॥ कास्प्रत्ययादाममंत्रे लिटि॥ इजादेश्च गुरुमतो
न्नृच्छः॥ दयायासश्च॥ उषविदजागृभ्यो न्यतरस्यां॥ भीह्रीभृहुवां
श्लुवच्च॥ कृञ्चानुप्रयुज्यते लिटि॥ २॥ विदांकुर्वंत्वित्यन्यतरस्यां॥
अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्नि
ति छंदसि॥ च्लि लुङि॥ च्लेः सिच्॥ शल इगुपधादनिटः क्सः॥ श्लिष
आलिंगने॥ न दृशः॥ णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्॥ विभाषा धेट्श्व्योः॥
गुपेश्छंदसि॥ नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः॥ अस्यतिव
क्तिख्यातिभ्योऽङ्॥ लिपिसिचिह्वश्च॥ आत्मनेपदेष्वन्यतरस्यां॥

सू·पा·३ पुषादिद्युताद्य्लृदितः परस्मैपदेषु॥ सर्त्तिशास्त्यर्त्तिभ्यश्च॥ इरितोवा॥ जॄ

स्तंभुम्रुचुम्लुचुग्रुचुग्लुचुग्लुंचुश्विभ्यश्च॥ कृमृदृरुहिभ्यश्छंदसि॥ चि

१५ ण्तेपदः॥३॥ दीपजनबुधपूरितायिप्यायिभ्योन्यतरस्यां॥ अचः कर्मक

र्त्तरि॥ दुहश्च॥ नरुधः॥ तपोनुतापेच॥ चिण्भावकर्मणोः॥ सार्वधातुकेयक्॥

कर्त्तरिशप्॥ दिवादिभ्यः श्यन्॥ वाभ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रु

टिलषः॥ यसोनुपसर्गात्॥ संयसश्च॥ स्वादिभ्यः श्नुः॥ श्रुवः शृच॥ अक्षो

न्यतरस्यां॥ तनूकरणेतक्षः॥ तुदादिभ्यः शः॥ रुधादिभ्यः श्नम्॥ तना १५

दिकृञ्भ्यउः॥ धिन्विकृण्व्योरच॥४॥ क्र्यादिभ्यः श्ना॥ स्तंभुस्तुंभु

स्कंभुस्कुंभुस्कुञ्भ्यः श्नुश्च॥ हलः श्नः शानज्झौ॥ छंदसिशायज

पि॥ व्यत्ययो बहुलं॥ लिङ्याशिष्यङ्॥ कर्मवत्कर्मणा तुल्यक्रियः॥ त
पस्तपः कर्मकस्यैव॥ नदुहः स्नुनमांय कूचिणो॥ कुषिरजोः प्राचां श्य
न्परस्मैपदंच॥ धातोः॥ तत्रोपपदं सप्तमी स्थं॥ कृदतिङ्॥ वासरूपो
स्त्रियां॥ कृत्याः प्राङ्ण्वुलः॥ तव्यत्तव्यानीयरः॥ अचोयत्॥ पोरदुप
धात्॥ शकिसहोश्च॥ गदमदचरयमश्चानुपसर्गे॥ ५॥ अवद्यप
ण्यवर्याग र्ह्यपणितव्यानिरोधेषु॥ वह्यंकरणं॥ अर्यः स्वामिवैश्ययोः॥
उपसर्याकाल्याप्रजने॥ अजर्यं संगतं॥ वदः सुपिक्यप्च॥ भुवो भावे॥
हनस्तच॥ एतिस्तुशास्वृदृ जुषः क्यप्॥ ऋदुपधाच्चाकृपिचृतेः॥ ईचि
ख़नः॥ भृञो संज्ञायां॥ मृजेर्विभाषा॥ राजसूयसूर्यमृषोद्यरुच्यकुप्य

सू॰पा॰३ ऌष्टप च्या व्यथ्याः॥ भिद्योद्ध्यौ नदे॥ पुष्यसिध्यौ नक्षत्रे॥ विप॰
यविनीयजित्यामुंजकल्कहलिषु॥ प्रत्यपिभ्यांग्रहेश्छंदसि॥ पद
१६ स्वैरिबाह्यापक्ष्येषुच॥ विभाषाकृवृषोः॥ ६॥ युग्यंचपत्रे॥ अमा
16 वस्यदन्यतरस्यां॥ छंदसिनिष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्य
मर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्य
भाव्यस्ताव्योपचाय्यपृडानि॥ ऋहलोर्ण्यत्॥ ओरावश्यके॥ आ
सुयुवपिरपिलपित्रपिचमश्च॥ आनाय्योनित्ये॥ प्रणाय्योसं १६
मतो॥ पाय्यसान्नाय्यनिकाय्यधाय्यामानहविर्निवाससा
मिधेनीषु॥ क्रतौकुंडपाय्यसंचाय्यौ॥ अग्नौपरिचाय्योपचा

य्यसमूह्याः॥ चित्याग्निचित्येच॥ ण्वुल्तृचौ॥ नंदिग्रहिपचादिभ्यो
ल्युणिन्यचः॥ इगुपधज्ञाप्रीकिरः कः॥ आतश्चोपसर्गे॥ पाघ्राध्माधे
दृशः शः॥ अनुपसर्गाल्लिंपविंदधारिपारिवेद्युदेजिचेतिसातिसा
हिभ्यश्च॥ ददातिदधात्योर्विभाषा॥ ज्वलितिकसंतेभ्योणः॥ ७॥
श्याद्व्यधास्रुसंस्रुतीणवसावहृलिहश्लिषश्वसश्च॥ दुन्योरनुप
सर्गे॥ विभाषाग्रहः॥ गेहेकः॥ शिल्पिनिष्वुन्॥ गस्थकन्॥ ण्युट्च॥
हश्चव्रीहिकालयोः॥ प्रुसृल्वः समभिहारेवुन्॥ आशिषिच॥ ८॥ ॥
प्रत्ययो गुंडविदांदीपजनक्यादिभ्योवघयुग्यंश्याद्व्यधादश॥
॥ ॥ इतितृतीयाध्यायस्य प्रथमः पादः॥ ॥ कर्मण्यण्॥ ह्वावा

स्र·पा·३

१७

17

मश्च ॥ आतोनुपसर्गे कः ॥ सुपि स्थः ॥ तुंदशोकयोः परिमृजापनुदोः ॥
प्रेदाज्ञः ॥ समि ख्यः ॥ गापोष्टक् ॥ हरतेरनुद्यमनेच् ॥ वयसि च ॥ आ
ङि ताच्छील्ये ॥ अर्हः ॥ स्तंबकर्णयोरमिजपोः ॥ शमिधातोः संज्ञायां ॥
अधिकरणे शेतेः ॥ चरेष्टः ॥ भिक्षासेनादायेषु च ॥ पुरोग्रतोग्रेषु सर्त्तेः ॥
पूर्वे कर्त्तरि ॥ कृञोहेतुताच्छील्यानुलोम्येषु ॥ १ ॥ दिवाविभानिशा
प्रभाभास्कारांतानंतादिबहुनांदीकिंलिपिलिबिबलिभक्तिकर्तृचि
त्रक्षेत्रसंख्याजंघाबाह्वहर्यत्तद्धनुररुष्षु ॥ कर्मणि भृतौ ॥ नश १७
ब्दश्लोककलहगाथावैरचाटुसूत्रमंत्रपदेषु ॥ स्तंबशकृतोरिन् ॥
हरतेर्दृतिनाथयोः पशौ ॥ फलेग्रहिरात्मंभरिश्च ॥ छंदसि वनस

नरक्षिमथां॥ एजेः खश्॥ नासिका स्तनयो र्ध्माधेटोः॥ नाडी मुष्ट्यो
श्च॥ उदि कूले रुजिवहोः॥ वहाभ्रे लिहः॥ परिमाणे पचः॥ मितनखेच॥
विध्वरुषोस्तुदः॥ असूर्यललाटयोर्दृशितपोः॥ उग्रंपश्येरंमदपा
णिंधमाश्च॥ प्रियवशेवदः खच्॥ द्विषत्परयोस्तापेः॥ वाचियमोव्रते॥
॥२॥ पूः सर्वयो र्दारिसहोः॥ सर्वकूलाभ्रकरीषेषुकषः॥ मेघर्त्तिभये
षुकृञः॥ क्षेमप्रियमद्रेण्च॥ आशितेभुवः करणभावयोः॥ संज्ञायां
भृतृवृजिधारिसहितपिदमः॥ गमश्च॥ अंतात्यंताध्वदूरपारसर्वानंतेषुडः॥
आशिषिहनः॥ अपेक्लेशतमसोः॥ कुमारशीर्षयोर्णिनिः॥ लक्षणे
जायापत्योष्टक्॥ अमनुष्यकर्त्तृकेच॥ शक्तौहस्तिकपाटयोः॥ पाणि

सहितपि

सू॰पा॰३ घताउ घोणि ल्पिनि॥ आक्यसुभग स्थूलपलित नग्नांध प्रियेषुच्व्य
र्थेष्व च्चौ कृञः करणे ख्युन्॥ कर्त्तरि भुवः खिष्णु च्खुकञौ॥ स्पृशोनु
१८ दके क्विन्॥ ऋत्विग्दधृक्स्रग्दिगुष्णिगंचु युजिक्रुंचांच॥ त्यदादिषु
18 दृशोनालोचने कञ्च॥३॥ सत्सू द्विषद्रुह दुहयुज विदभिद छिद जिनी
राजा मुपसर्गे पि क्विप्॥ भजोण्विः॥ छंदसि सहः॥ वहश्च॥ कव्यपुरी
षपुरीष्येषु ञ्युट्॥ हव्येनंतःपादं॥ जनसन खन क्रम गमो विट्॥
अदो नन्ने॥ क्रव्येच॥ दुहः कब्घश्च॥ मंत्रेश्वेतवहोक्थशस्पुरोडाशो
ण्विन्॥ अवेयजः॥ विजुपे छंदसि॥ आतोमनिन्क्वनिब्वनिपश्च॥ ३८
अन्येभ्योपिदृश्यंते॥ क्विप्च॥ स्थः कच॥ सुप्यजातौणिनिस्ताच्छी

ल्ये॥ कर्त्तर्युपमाने॥ व्रते॥ ४॥ बहुलमाभीक्ष्ण्ये॥ मनः॥ आत्ममा
नेखश्च॥ भूते॥ करणेयजः॥ कर्मणिहनः॥ ब्रह्मभ्रूणवृत्रेषुक्विप्॥
बहुलंछंदसि॥ सुकर्मपापमंत्रपुण्येषुकृञः॥ सोमेसुञः॥ अग्नौचेः॥
कर्मण्यग्न्याख्यायां॥ कर्मणीनिविक्रियः॥ दृशेः क्वनिप्॥ राजनियु
धिकृञः॥ सहेच॥ सप्तम्यांजनेर्डः॥ पंचम्यामजातौ॥ उपसर्गेच
संज्ञायां॥ अनौकर्मणि॥ ५॥ अन्येष्वपिदृश्यते॥ निष्ठा॥ सुयजोर्ङ्
निप्॥ जीर्यतेरतृन्॥ छंदसिलिट्॥ लिटः कानज्वा॥ क्वसुश्च॥ भा
षायांसदवसश्रुवः॥ उपेयिवाननाश्वानन्नूचानश्च॥ लुङ्॥ अन
द्यतनेलङ्॥ अभिज्ञावचनेल्रृट्॥ नयदि॥ विभाषासाकांक्षे॥

सू॰पा॰३ परोक्षे लिट्॥ हशश्वतोर्लङ् च॥ प्रश्ने चासन्नकाले॥ लट् स्मे॥ अपरो
क्षे च॥ ननौ पृष्टप्रतिवचने॥ ६॥ नन्वोर्विभाषा॥ पुरि लुङ् चास्मे॥ व
१९ र्तमाने लट्॥ लटः शतृशानचावप्रथमासमानाधिकरणे॥ संबोध
19 ने च॥ लक्षणहेत्वोः क्रियायाः॥ तौ सत्॥ पूङ्यजोः शानन्॥ ताच्छी
ल्यवयोवचनशक्तिषु चानश्॥ इङ्धार्योः शत्रकृच्छ्रिणि॥ द्विषोऽमि
त्रे॥ सुञो यज्ञसंयोगे॥ अर्हः प्रशंसायाम्॥ आक्वेस्तच्छीलतद्धर्मत
त्साधुकारिषु॥ तृन्॥ अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्य त्यचो १९
पत्रपवृतुवृधुसहचर इष्णुच्॥ णेश्छंदसि॥ भुवश्च॥ ग्लाजिस्थ
श्च क्स्नुः॥ त्रसिगृधिधृषिक्षिपेः क्नुः॥ ७॥ शमित्यष्टाभ्यो घिनु

प्॥ संप्रचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च॥ वौकषलसकत्थस्रंभः॥ अपेचलषः॥ प्रेलपसृद्रुमथवदवसः॥ निंदहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयोवुञ्॥ देविक्रुशोश्चोपसर्गे॥ चलनशब्दार्थादकर्मकाद्युच्॥ अनुदात्तेतश्च हलादेः॥ जुचंक्रम्यदंद्रम्यसृगृधिज्वलशुचलषपतपदः॥ क्रुधमंडार्थेभ्यश्च॥ नयः॥ सूददीपदीक्षश्च॥ लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ्॥ जल्पभिक्षकुट्टलुंठवृङः षाकन्॥ प्रजोरिनिः॥

सू॰पा॰३ जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च॥ स्पृहिगृहिप
२० तिदयिनिद्रातंद्राश्रद्धाभ्य आलुच्॥ दाधेट्सिशदसदो रुः॥ सृघ
२० स्यदः क्मरच्॥ ८॥ भंजभासमिदो घुरच्॥ विदिभिदिछिदेः कुरच्॥ इ
ण्नश्जिसर्त्तिभ्यः क्वरप्॥ गत्वरश्च॥ जागुरूकः॥ यजजपदशां यङः॥
नमिकंपिस्म्यजसकमहिंसदीपो रः॥ सनाशंसभिक्ष उः॥ विंदुरिच्छुः॥
क्याच्छंदसि॥ आदृगमहनजनः किकिनौ लिट् च॥ स्वपितृषो र्न
जिङ्॥ शॄवंद्योरारुः॥ भियः क्रुक्लुकनौ॥ स्थेशभासपिसकसो वरच्॥
यश्च यङः॥ भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्॥ अन्ये २०
भ्योपि दृश्यते॥ भुवः संज्ञांतरयोः॥ विप्रसंभ्यो ड्वसंज्ञायां॥ २॥ धः क

र्मणिष्ठूनः॥ दाम्नी न्ना सयुयुजस्तु तुद सि सिच मिह पत दश्ना नहः करणे॥
हलसूकरयोः पुवः॥ अर्त्तिलूधू सूखन सहचर इत्रः॥ पुवः संज्ञायां॥
कर्त्त रिच र्षिदेवतयोः॥ ञीतः क्तः॥ मतिबुद्धिपूजार्थेभ्यश्च॥ १०॥ ॥
॥ ॥ कर्मणिदिवाप्नः सर्वस त्सूब कुलम न्येष्वपिनन्वोः त्रामितिसंज
भासधः कर्मण्यष्टौ॥ ॥ इतित्ततीयाध्यायस्यद्धितीयःपादः॥ ॥
उणादयो बहुलं॥ भूतेपिदृश्यंते॥ भविष्यतिगम्यादयः॥ यावत्पुरानि
पातयोर्लट्॥ विभाषाकदाकर्ह्योः॥ किंवृत्ते लिप्सायां॥ लिप्स्यमानसिद्धौ
च॥ लोडर्थलक्षणेच॥ लिङ्चोर्ध्वमौहूर्त्तिके॥ तुमुन्ण्वुलौक्रियायां
क्रियार्थायां॥ भाववचनाश्च॥ अणकर्मणिच॥ लृट्शेषेच॥ लृ

सू॰पा॰३ टः सद्वा॥ अनद्यतने लुट्॥ पदरुजविशस्पृशो घञ्॥ सृ स्थिरे॥ भा
२१ वे॥ अकर्त्तरि च कारके संज्ञायां॥ परिमाणाख्यायां सर्वेभ्यः॥ १॥ इ
21 ङश्च॥ उपसर्गे रुवः॥ समियुद्रुदुवः॥ श्रिणीभुवो नुपसर्गे॥ वौ क्षु
श्रुवः॥ अवोदोर्नियः॥ प्रे द्रुस्तुस्रुवः॥ निरभ्योः पूल्वोः॥ उन्योर्ग्रः॥
कॄ धान्ये॥ यज्ञे समि स्तुवः॥ प्रे स्त्रोयज्ञे॥ प्रथने वावशब्दे॥ छंदो
नाम्नि च॥ उदि ग्रहः॥ समि मुष्टौ॥ परिन्योर्नीणोर्द्यूताभ्रेषयोः॥
परावनुपात्ययइणः॥ व्युपयोः शेतेः पर्याये॥ हस्तादाने चेरस्ते २१
ये॥ २॥ निवासचितिशरीरोपसमाधानेष्वादेश्च कः॥ संघे चानौ
त्तराधर्ये॥ कर्मव्यतिहारेण च् स्त्रियां॥ अभिविधौ भावइनुण्॥

आक्रोशेव न्योर्ग्रहः॥ प्रेलिप्सायां॥ परौयज्ञे॥ नोवृधान्ये॥ उदिश्रय
तियौतिपूद्रुवः॥ विभाषाङिरुप्लुवोः॥ अवेग्रहोवर्षप्रतिबंधे॥ प्रेव
णिजां॥ रश्मौच॥ वृणोतेराच्छादने॥ परौभुवोवज्ञाने॥ एरच्॥ ॠ
दोरप्॥ ग्रहवृदृनिश्चिगमश्च॥ उपसर्गेदः॥ नोणच॥ ३॥ व्यधजपोर
नुपसर्गे॥ स्वनहसोर्वा॥ यमः समुपनिविषुच॥ नौगदनदपठस्व
नः॥ क्वणोवीणायांच॥ नित्यंपणः परिमाणे॥ मदोनुपसर्गे॥ प्र
मदसंमदौहर्षे॥ समुदोरजः पशुषु॥ अक्षेषुग्लहः॥ प्रजनेसर्त्तेः॥
ह्वः संप्रसारणंचन्यभ्युपविषु॥ आङियुद्धे॥ निपानमाहावः॥ भा
वेनुपसर्गस्य॥ हनश्चवधः॥ मूर्त्तौघनः॥ अंतर्घनोदेशे॥ अगारै

गोपाल

स्.पा.२ कृदेशोप्रघणः प्रघाणश्च॥ उद्घनो त्याधानं॥ ४॥ अपघनोंगं॥ कर
२२ णे योविद्रुषु॥ स्तंबेकच॥ परीघः॥ उपघ्न आश्रये॥ संघोद्घोगण
२२ प्रशंसयोः॥ निघोनिमितं॥ ड्वितः क्त्रिः॥ ट्वितोथुच्॥ यजयाचय
तविछप्रछरक्षोनङ्॥ स्वपोनन्॥ उपसर्गेघोः किः॥ कर्मण्यधि
करणेच॥ स्त्रियांक्तिन्॥ स्थागापापचोभावे॥ मंत्रेवृषेषपच
मनविदभूवीराउदात्तः॥ ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च॥
व्रजयजोर्भावेक्यप्॥ संज्ञायांसमजनिषदनिपतमनविदषु
सूञ्शीङ्भृञ्इणः॥ कृञः शच॥ ५॥ इच्छा॥ अप्रत्ययात्॥ गु २२
रोश्चहलः॥ षिद्भिदादिभ्योऽङ्॥ चिंतिपूजिकथिकुंबिचर्चश्च॥

आतश्चोपसर्गे॥ प्यासश्रंथोयुच्॥ रोगाख्यायांण्वुल्बहुलं॥ सं
ज्ञायां॥ विभाषाख्यानपरिप्रश्नयोरिञ्च॥ पर्यायार्हर्णोत्पत्तिषु
ण्वुच्॥ आक्रोशेनञ्यनिः॥ कृत्यल्युटोबहुलं॥ नपुंसकेभावेक्तः॥
ल्युट्च॥ कर्मणिचयेनसंस्पर्शात्कर्तुःशरीरसुखं॥ करणाधिकर
णयोश्च॥ पुंसिसंज्ञायांघःप्रायेण॥ गोचरसंचरवहव्रजव्यजा
पणनिगमाश्च॥ अवेतॄस्त्रोर्घञ्॥ द्व॥ हलश्च॥ अध्यायन्या
योद्यावसंहाराधारावायाश्च॥ उदंकोनुदके॥ जालमानायः॥ ख
नोघच॥ ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषुखल्॥ कर्तृकर्मणोश्चभू
कृञोः॥ आतोयुच्॥ छंदसिगत्यर्थेभ्यः॥ अन्येभ्योपिदृश्यते॥

सू॰पा॰३ वर्त्तमानसामीप्येवर्त्तमानवद्वा॥ आशंसायांभूतवच्च॥ क्षिप्रव
२२ चनेल्लृट्॥ आशंसावचनेलिङ्॥ नानद्यतनवत्क्रियाप्रबंधसा
मीप्ययोः॥ भविष्यतिमर्यादावचनेवरस्मिन्॥ कालविभागेचान
२३ होरात्राणां॥ परस्मिन्विभाषा॥ लिङ्निमित्तेल्लृङ्क्रियातिपत्तौ॥
भूतेच॥ ७॥ वोताप्योः॥ गर्हायांलडपिजात्वोः॥ विभाषाकथमि
लिङ्च॥ किंवृत्तेलिङ्ल्लृटौ॥ अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि॥
किंकिलास्त्यर्थेषुल्लृट्॥ जातुयदोर्लिङ्॥ यच्चयत्रयोः॥ गर्हायां
च॥ चित्रीकरणेच॥ शेषेल्लृडयदौ॥ उताप्योः समर्थयोर्लिङ्॥ का २३
मप्रवेदनेकच्चिति॥ संभावनेलमितिचेत्सिद्धाप्रयोगे॥ विभाषाधा

तो संभावनवचने यदि ॥ हेतुहेतुमतोर्लिङ् ॥ इच्छार्थेषु लिङ्लोटौ ॥
समानकर्त्तृकेषु तुमुन् ॥ लिङ् च ॥ इच्छार्थेभ्यो विभाषा वर्त्तमाने ॥
॥ ८ ॥ विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ॥ लोट् च ॥
प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥ लिङ् चोर्ध्वमौहूर्त्तिके ॥ स्मे लो
ट् ॥ अधीष्टे च ॥ कालसमयवेलासु तुमुन् ॥ लिङ्यदि ॥ अर्हे कृत्यतृ
चश्च ॥ आवश्यकाधमर्ण्ययोर्णिनिः ॥ कृत्याश्च ॥ शकि लिङ् च ॥ आ
शिषि लिङ्लोटौ ॥ क्तिच्क्तौ च संज्ञायां ॥ माङि लुङ् ॥ स्मोत्तरे लङ् च ॥ ३ ॥ उणा
दयश्च ॥ ० निशासव्यधापघनोंगमिच्छाहलश्च वौ ताभ्यो विधिषेशेऽच्॥ ॥ इति
तृतीयाध्यायस्य तृतीयः पादः ॥ ॥ धातुसंबंधे प्रत्ययाः ॥ क्रियासमभि

सू॰पा॰३ हारे लोट् लोटो हिस्वौ वा च तध्वमोः॥ समुच्चयेन्यतरस्यां॥ यथावि
ध्यनुप्रयोगः पूर्वस्मिन्॥ समुच्चये सामान्यवचनस्य॥ छंदसि लुङ् ल
२४ ङ् लिटः॥ लिङर्थे लेट्॥ उपसंवादाशंकयोश्च॥ तुमर्थे सेसेनसेअ
२५ सेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैशध्यैशध्यैन्तवैतवेङ्
तवेनः॥ प्रयैरोहिष्यै अव्यथिष्यै॥ दृशे विख्ये च॥ शकिणमुल्क
मुलौ॥ ईश्वरे तोसुन्कसुनौ॥ कृत्यार्थे तवैकेन्केन्यत्वनः॥ अव
चक्षे च॥ भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्॥
सृपितृदोः कसुन्॥ अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा॥ उदी २४
चां माङो व्यतीहारे॥ परावरयोगे च॥ १॥ समानकर्तृकयोः पूर्व

काले॥ आभीक्ष्ण्येणमुल्च॥ नयद्यनाकांक्षे॥ विभाषाग्रेप्रथमपूर्वेषु॥ क
र्मण्याक्रोशेकृञः खमुञ्॥ स्वादुमिणमुल्॥ अन्यथैवंकथमित्थंसु
सिद्धाप्रयोगश्चेत्॥ यथातथयोरसूयाप्रतिवचने॥ कर्मणिदृशिविदोः
साकल्ये॥ यावतिविंदजीवोः॥ चर्मोदरयोः पूरेः॥ वर्षप्रमाणऊलोपश्चा
स्यान्यतरस्यां॥ चेलेक्नोपेः॥ निमूलसमूलयोः कषः॥ शुष्कचूर्णरू
क्षेषुपिषः॥ समूलाकृतजीवेषुहन्कृञ्ग्रहः॥ करणेहनः॥ स्नेहनेपि
षः॥ हस्तेवर्त्तिग्रहोः॥ स्वेपुषः॥ २॥ अधिकरणेबंधः॥ संज्ञायां॥ कर्त्रोर्जी
वपुरुषयोर्नशिवहोः॥ ऊर्ध्वेशुषिपूरोः॥ उपमानेकर्मणिच॥ कषादि
षुयथाविध्यनुप्रयोगः॥ उपदंशस्तृतीयायां॥ हिंसार्थानांचसमानक

स्व॰पा॰३ र्मकाणां॥ सप्तम्यांचोपपीडरुधकर्षः॥ समासत्तौ॥ प्रमाणेच॥ अपा
२५ दाने परीप्सायां॥ द्वितीयायांच॥ स्वांगेध्रुवे॥ परिक्लिश्यमानेच॥ विशि
25 पतिपदिस्कंदां व्याप्यमानासेव्यमानयोः॥ अस्यतितृषोः क्रियांतरे
कालेषु॥ नाम्न्यादिशिग्रहोः॥ अव्ययेयथाभिप्रेताख्याने कृञः क्त्वा
णमुलौ॥ तिर्यच्यपवर्गे॥ ३॥ स्वांगेतस्प्रत्ययेकृभ्वोः॥ नाधार्थप्रत्यये
च्व्यर्थे॥ तूष्णीमिभुवः॥ अन्वच्यानुलोम्ये॥ शकधृषज्ञाग्लाघटरभल
भक्रमसहार्हास्त्यर्थेषुतुमुन्॥ पर्याप्तिवचनेष्वलमर्थेषु॥ कर्त्तरिकृत॥ भ २५
व्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्यावा॥ लः कर्मणिच भा
वेचाकर्मकेभ्यः॥ तयोरेवकृत्यक्तखलर्थाः॥ आदिकर्मणिक्तः कर्त्तरिच॥

गस्यर्था कर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च॥ दाणागोघ्नो संप्रदा
ने॥ भीमादयोपादाने॥ ताभ्यामन्यत्रोणादयः॥ क्तोधिकरणेच ध्रौव्यगतिप्रत्य
वसानार्थेभ्यः॥ लस्य॥ तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहि
महिङ्॥ टितआत्मनेपदानांटेरे॥ थासः से॥ ४॥ लिटस्तझयोरेशिरेच्॥ परस्मैपदा
नांणलतुसुस्थलथुसणल्वमाः॥ विदोलटोवा॥ ब्रुवः पंचानामादितआहोब्रुवः॥ लो
टोलङ्वत्॥ एरुः॥ सेर्ह्यपिच्च॥ वाछंदसि॥ मेर्निः॥ आमेतः॥ सवाभ्यांवामौ॥ आडुत्तमस्य
पिच्च॥ एतऐ॥ लेटोडाटौ॥ आतऐ॥ वैतोन्यत्र॥ इतश्चलोपः परस्मैपदेषु॥ सउत्तमस्य॥ नि
त्यंङितः॥ इतश्च॥ ५॥ तस्थस्थमिपांतांतंतामः॥ लिङः सीयुट्॥ यासुट्परस्मैपदेषूदा
त्तोङिच्च॥ किदाशिषि॥ झस्यरन्॥ इटोत्॥ सुट्तिथोः॥ झेर्जुस्॥ सिजभ्यस्तविदिभ्यश्च॥

आतः॥ लङः शाकटायनस्यैव॥ द्विषश्च॥ तिङ्शित्सार्वधातुकं॥ आर्द्धधातुकंशे
षः॥ लिट्च॥ लिङाशिषि॥ छंदस्युभयथा॥ ६॥ ॥धातुसंबंधेसमानाधिकरणे
स्वांगेलिटस्तस्थरस्थमिपांसप्तदश॥ ॥इतितृतीयाध्यायस्यचतुर्थःपादः॥ ॥इति
सूत्रपाठेतृतीयोऽध्यायःसमाप्तः॥ ॥हरिःॐ३॥ ॥ङ्याप्प्रातिपदिकात्॥ स्वौ
जसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यसङसिभ्यांभ्यसङसोसाम्ङ्योःसु
प्॥ स्त्रियां॥ अजाद्यतष्टाप्॥ ऋन्नेभ्योङीप्॥ उगितश्च॥ वनोर २६
च॥ पादोन्यतरस्यां॥ टाबृचि॥ नषट्स्वस्रादिभ्यः॥ मनः॥ अनोब

ऊव्रीहेः।। डाबुभाभ्यामन्यतरस्यां।। अनुपसर्जनात्।। टिड्ढाणञ्द्वय
सज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्ख्युनां।। यञश्च।। प्राचां
ष्फतद्धितः।। सर्वत्रलोहितादिकतंतेभ्यः।। कौरव्यमांडूकाभ्यांच।। वय
सिप्रथमे।। १।। द्विगोः।। अपरिमाणबिस्ताचितकंबल्येभ्योनतद्धि
तलुकि।। कांडांतात्क्षेत्रे।। पुरुषात्प्रमाणेन्यतरस्यां।। बऊव्रीहेरूध
सोङीष्।। संख्याव्ययादेङीप्।। दामहायनांताच्च।। अनउपधालो
पिनोन्यतरस्यां।। नित्यंसंज्ञाछंदसोः।। केवलमामकभागधेयपापा
परसमानार्यकृतसुमंगलभेषजाच्च।। रात्रेश्चाजसौ।। अंतर्वत्पतिवतोर्नु
क्।। पत्युर्नोयज्ञसंयोगे।। विभाषासपूर्वस्य।। नित्यंसपत्न्यादिषु।। पूतक्र

सू॰पा॰४ तोरैच॥ इषाकप्यग्निकुसितकुसिदानामुदात्तः॥ मनोरौवा॥ वर्णा
२७ दनुदात्तात्तोपधात्तोनः॥ अन्यतोङीष्॥२॥ षिद्गौरादिभ्यश्च॥ जानप
दकुंडगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्यमत्रा
27 वपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छा
केशवेशेषु॥ शोणात्प्राचां॥ वोतोगुणवचनात्॥ बह्वादिभ्यश्च॥ नि
त्यंछंदसि॥ भुवश्च॥ पुंयोगादाख्यायां॥ इंद्रवरुणभवशर्वरुद्रमृडहि
मारण्ययवयवनमातुलाचार्याणामानुक्॥ क्रीतात्करणपूर्वात्॥ २७
क्तादल्पाख्यायां॥ बहुव्रीहेश्चांतोदात्तात्॥ अस्वांगपूर्वपदाद्वा॥ स्वां
गाच्चोपसर्जनादसंयोगोपधात्॥ नासिकोदरोष्ठजंघादंतकर्णशृं

गाच्च।। नक्रोडादिबह्वचः।। सहनञ्विद्यमानपूर्वाच्च।। नखमुखात्सं
ज्ञायां।। दीर्घजिह्वी च छंदसि।। दिक्पूर्वपदान्ङीप्।। ३।। वाहः।। सख्यशि
श्वीतिभाषायां।। जातेरस्त्रीविषयादयोपधात्।। पाककर्णपर्णपुष्प
फलमूलवालोत्तरपदाच्च।। इतो मनुष्यजातेः।। ऊङुतः।। बाह्वंतात्सं
ज्ञायां।। पंगोश्च।। ऊरूत्तरपदादौपम्ये।। संहितशफलक्षणवामादे
श्च।। कद्रुकमंडल्वोश्छंदसि।। संज्ञायां।। शार्ङ्गरवाद्यञो ङीन्।। य
ङश्चाप्।। आवट्याच्च।। तद्धिताः।। यून स्तिः।। अणिञोरनार्षयोर्गु
रूपोत्तमयोः ष्यङ् गोत्रे।। गोत्रावयवात्।। क्रौड्यादिभ्यश्च।। ४।। दै
वयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्यो न्यतरस्यां।। समर्था

स्र॰ पा॰ ४ नांप्रथमाद्वा ॥ प्राग्दीव्यतोण् ॥ अश्वपत्यादिभ्यश्च ॥ दित्यदित्या
२८ दित्यपत्युत्तरपदाण्ण्यः ॥ उत्सादिभ्योञ् ॥ स्त्रीपुंसाभ्यां नञ्स्न
ञौ भवनात् ॥ द्विगोर्लुगनपत्ये ॥ गोत्रेलुगचि ॥ यूनिलुक् ॥ फक्
फिञोरन्यतरस्यां ॥ तस्यापत्यं ॥ एकोगोत्रे ॥ गोत्राद्यून्यस्त्रियां ॥ अ
तइञ् ॥ बाह्वादिभ्यश्च ॥ सुधातुरकङ्च ॥ गोत्रेकुंजादिभ्यश्च्फञ् ॥
नडादिभ्यः फक् ॥ हरितादिभ्योञः ॥ ५ ॥ यञिञोश्च ॥ शारद्वच्छुन
कदर्भाद्भृगुवत्साग्रायणेषु ॥ द्रोणपर्वतजीवंतादन्यतरस्यां ॥
अनृष्यानंतर्ये बिदादिभ्योञ् ॥ गर्गादिभ्योयञ् ॥ मधुबभ्र्वोर्ब्रा २८
ह्मणकौशिकयोः ॥ कपिबोधादांगिरसे ॥ वतंडाच्च ॥ लुक्स्त्रियां ॥

अश्वादिभ्यः फञ्॥ भर्गात्त्रैगर्त्ते॥ शिवादिभ्योऽण्॥ अवृद्धाभ्यो नदी
मानुषीभ्यस्तन्नामिकाभ्यः॥ ऋष्यंधकवृष्णिकुरुभ्यश्च॥ मातुरुत्सं
ख्यासंभद्रपूर्वायाः॥ कन्यायाः कनीन च॥ विकर्णशुंगछगलाद्वत्स
भरद्वाजात्रिषु॥ पीलाया वा॥ ढक् च मंडूकात्॥ स्त्रीभ्यो ढक्॥ द्॥
द्व्यचः॥ इतश्चानिञः॥ शुभ्रादिभ्यश्च॥ विकर्णकुषीतकात्काश्य
पे॥ भ्रुवो वुग्च॥ कल्याण्यादीनामिनङ्॥ कुलटाया वा॥ चटका
या ऐरक्॥ गोधाया ढ्रक्॥ आरगुदीचां॥ क्षुद्राभ्यो वा॥ पितृष्वसुश्छ
ण्॥ ढकि लोपः॥ मातृष्वसुश्च॥ चतुष्पाद्भ्यो ढञ्॥ गृष्ट्यादिभ्यश्च॥
राजश्वशुराद्यत्॥ क्षत्राद्घः॥ कुलात्खः॥ अपूर्वपदादन्यतरस्यां यड्ढ

सू॰पा॰४ कञ्ञो॥७॥महाकुलादञ्खञौ॥ दुष्कुलाड्ढक्॥ स्वसुश्छः॥ भ्रातुर्व्यच्च॥
व्यन्त्सपत्ने॥ रेवत्यादिभ्यः ठक्॥ गोत्रस्त्रियाः कुत्सनेणच॥ वृद्धाट्ठक्सौ
२९ वीरेषुबहुलं॥ फेश्छच॥ फांटाहृतिमिमताभ्यां णफिञौ॥ कुर्वादिभ्योण्यः॥
सेनांतलक्षणकारिभ्यश्च॥ उदीचामिञ्॥ तिकादिभ्यः फिञ्॥ कौस
ल्यकार्मार्याभ्यांच॥ अणोद्व्यचः॥ उदीचांवृद्धादगोत्रात्॥ वाकिनादीनां
कुक्च॥ पुत्रांतादन्यतरस्यां॥ प्राचामवृद्धात्फिन्बहुलं॥८॥ मनोर्जा
तावञ्यतोषुक्च॥ अपत्यंपौत्रप्रभृतिगोत्रं॥ जीवतितुवंश्येयुवा॥ २९
भ्रातरिचज्यायसि॥ वान्यस्मिन्त्सपिंडेस्थविरतरेजीवति॥ वृद्धस्य
चपूजायां॥ यूनश्चकुत्सायां॥ जनपदशब्दात्क्षत्रियादञ्॥ साल्वेय

गांधारिभ्यांच॥ द्व्यञ्मगधकलिंगसूरमसादण्॥ वृद्धेत्कोसलाजा
दाञ्ञ्यङ्॥ कुरुनादिभ्योण्यः॥ साल्वावयवप्रत्यग्रथकलकूटा
श्मकादिञ्॥ तेतद्राजाः॥ कंबोजाल्लुक्॥ स्त्रियामवंतिकुंतिकुरुभ्य
श्च॥ अतश्च॥ नप्राच्यभर्गादियौधेयादिभ्यः॥२॥ ॥ ङ्याप्पूर्द्विगोः
षिञ्ञोराद्विवाहो दैवयज्ञियत्रिञो द्व्यचो महाकुलान्मनोर्जातावष्टाद
श॥ ॥ इतिचतुर्थाध्यायस्यप्रथमः पादः॥ ॥ तेनरक्तंरागात्॥ लाक्षा
रोचनाच्छकलकर्दमाट्ठक्॥ नक्षत्रेणयुक्तः कालः॥ लुबविशेषे॥ सं
ज्ञायांश्रवणाश्वत्थाभ्यां॥ द्वंद्वाच्छः॥ दृष्टंसाम॥ कलेर्ढक्॥ वामदे
वाड्ड्यड्ड्यौ॥ परिवृतोरथः॥ पांडुकंबलादिनिः॥ द्वैपवैयाघ्रादञ्॥ कौ

स्.पा.४ मारापूर्ववचने॥ तत्रोद्धृतममत्रेभ्यः॥ स्थंडिलाच्छयितरिव्रते॥ संस्कृ
३० तंभक्षाः॥ शूलोखाद्यत्॥ दध्नष्ठक्॥ उदश्वितोन्यतरस्यां॥ क्षीराड्ढ
30 ञ्॥१॥ सास्मिन्पौर्णमासीतिसंज्ञायां॥ आग्रहायण्यश्वत्थाट्ठक्॥
विभाषाफाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः॥ सास्यदेवता॥ कस्ये
त्॥ शुक्राद्घन्॥ अपोनप्त्रपांनप्तृभ्यांघः॥ छच॥ महेंद्राद्घाणौच॥ सो
मात्ट्यण्॥ वाय्वृतुपित्रुषसोयत्॥ द्यावापृथिवीशुनासीरमरुत्व
दग्नीषोमवास्तोष्पतिगृहमेधाच्छच॥ अग्नेर्ढक्॥ कालेभ्योभवव ३०
त्॥ महाराजप्रोष्ठपदाट्ठञ्॥ पितृव्यमातुलमातामहपितामहाः॥ त
स्यसमूहः॥ भिक्षादिभ्योण्॥ गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपु

ञ्वत्समनुष्याजाद्वुञ्॥ केदाराद्यञ्च॥ २॥ ठञ्कवचिनश्च॥ ब्राह्म
णमाणववाडवाद्यत्॥ ग्रामजनबंधुसहायेभ्यस्तल्॥ अनुदात्तादे
रञ्॥ खंडिकादिभ्यश्च॥ चरणेभ्यो धर्मवत्॥ अचित्तहस्तिधेनोष्ठ
क्॥ केशाश्वाभ्यां यञ्छावन्यतरस्यां॥ पाशादिभ्यो यः॥ खल
गोरथात्॥ इनित्रकट्यचश्च॥ विषयो देशे॥ राजन्यादिभ्यो वुञ्॥
भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ॥ सोस्यादिरितिछंद
सः प्रगाथेषु॥ संग्रामेप्रयोजनयोद्धृभ्यः॥ तदस्यां प्रहरणमि
तिक्रीडायांणः॥ घञः सास्यां क्रियेतिञः॥ तदधीतेतद्वेद॥ क्रतू

सू॰पा॰४ कथादिसूत्रांताट्ठक्॥३॥क्रमादिभ्योवुन्॥अनुब्राह्मणादिनिः॥वसं
३१ तादिभ्यःष्ठक्॥प्रोक्ताल्लुक्॥सूत्राच्चकोपधात्॥छंदोब्राह्मणानि
31 चतद्विषयाणि॥तदस्मिन्नस्तीतिदेशेतन्नाम्नि॥तेननिर्वृत्तं॥तस्य
निवासः॥अदूरभवश्च॥ओरञ्॥मतोश्चबह्वजंगात्॥बह्वचःकू
पेषु॥उदक्चविपाशः॥संकलादिभ्यश्च॥स्त्रीषुसौवीरसाल्वप्रा
क्षु॥सुवास्त्वादिभ्योण्॥रोणी॥कोपधाच्च॥वुञ्छण्कठजिलसे ३१
निरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोरीहणल्कशाश्वत्र्यकुमुदकाश
तृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः॥
॥४॥जनपदेलुप्॥वरणादिभ्यश्च॥शर्करायावा॥ठक्छौच॥नद्यांमतुप्॥

मध्वादिभ्यश्च॥ कुमुदनडवेतसेभ्यो ड्मतुप्॥ नडशादाड्ड्वलच्॥ शिखा
यावलच्॥ उत्करादिभ्यश्छः॥ नडादीनांकुक्च॥ शेषे॥ राष्ट्रावारपाराद्घ
खौ॥ ग्रामाद्यखञौ॥ कत्त्र्यादिभ्योढकञ्॥ कुलकुक्षिग्रीवाभ्यःश्वा
स्यलंकारेषु॥ नद्यादिभ्योढक्॥ दक्षिणापश्चात्पुरसस्त्यक्॥ कापिश्या
ष्फक्॥ रंकोरमनुष्येण्च॥ ५॥ द्युप्रागपागुदक्प्रतीचोयत्॥ कंथाया
ष्ठक्॥ वर्णौवुक्॥ अव्ययात्त्यप्॥ ऐषमोह्यःश्वसोन्यतरस्यां॥ तीररू
प्योत्तरपदादञ्ञौ॥ दिक्पूर्वपदादसंज्ञायांञः॥ मद्रेभ्योञ्॥ उदीच्य
ग्रामाच्चबह्वचोंतोदात्तात्॥ प्रस्थोत्तरपदपलद्यादिकोपधादण्॥ कण्वा
दिभ्योगोत्रे॥ इञश्च॥ नद्व्यचःप्राच्यभरतेषु॥ वृद्धाच्छः॥ भवतष्ठ

सू॰पा॰४ कूछसो॥ काश्यादिभ्यः ठञ्ञिठौ॥ वाहीकग्रामेभ्यश्च॥ विभाषोशीनरेषु॥ ओ
३२ दे॑ञ्ठञ्॥ वृद्धात्प्राचां॥ ६॥ धन्वयोपधाद्वुञ्॥ प्रस्थपुरवहांच्च॥ रोपधेतोः ता
32 प्राचां॥ जनपदतदवध्योश्च॥ अवृद्धादपिबहुवचनविषयात्॥ कच्छाग्नि
वक्त्रगर्त्तोत्तरपदात्॥ धूमादिभ्यश्च॥ नगरात्कुत्सनप्रावीण्ययोः॥ अ
रण्यान्मनुष्ये॥ विभाषा कुरुयुगंधराभ्यां॥ मद्रवृज्योः कन्॥ कोपधादण्॥
कच्छादिभ्यश्च॥ मनुष्यतत्स्थयोर्वुञ्॥ अपदातौ साल्वात्॥ गोयवाग्वो
श्च॥ गर्त्तोत्तरपदाच्छः॥ गहादिभ्यश्च॥ प्राचां कटादेः॥ राज्ञः कच॥ ७॥ २२
वृद्धादकेकांतखोपधात्॥ कंथापलदनगरग्रामह्रदोत्तरपदात्॥ पर्वता
च्च॥ विभाषामनुष्ये॥ कृकणपर्णाद्भारद्वाजे॥ ८॥ ॥ तेनैं सास्मिन्
रतं

न्कमादिभ्योजनपदेघुष्प्रागपाग्धन्व दृन्दात्यंच॥ ॥इतिचतुर्थाध्याय
स्यद्वितीयः पादः॥ ॥युष्मदस्मदोरन्यतरस्यांखञ्च॥ तस्मिन्नणिचयु
ष्माकास्माको॥ तवकममकावेकवचने॥ अर्धाद्यत्॥ परावराधमोत्तम
पूर्वाच्च॥ दिक्पूर्वपदाठ्ञ्च॥ ग्रामजनपदैकदेशादञ्ठञो॥ मध्यान्मः॥
असांप्रतिके॥ द्वीपादनुसमुद्रंयञ्॥ कालाठ्ञ्॥ श्राद्धेशरदः॥ विभा
षारोगातपयोः॥ निशाप्रदोषाभ्यांच॥ श्वसस्तुट्च॥ संधिवेलाद्यृतु
नक्षत्रेभ्योण्॥ प्रावृषएण्यः॥ वर्षाभ्यः ष्ठकु॥ छंदसिठञ्॥ वसंताच्च॥
॥१॥ हेमंताच्च॥ सर्वत्राण्चतलोपश्च॥ सायंचिरंप्राह्णेप्रगेव्ययेभ्यष्ट्युट्यु
लौतुट्च॥ विभाषापूर्वाह्णापराह्णाभ्यां॥ तत्रजातः॥ प्रावृषष्ठप्॥

सू॰पा॰४ संज्ञायांशारदो वुञ्॥ पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन्॥ पथः पंथ
च॥ अमावास्याया वा॥ अ च॥ सिंधूपकराभ्यां कन्॥ अणञौ च॥ श्रविष्ठा
३२ फल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक्॥ स्था
नांतगोशालखरशालाच्च॥ वत्सशालाभिजिदश्वयुक्छतभिषजो वा॥ नक्ष
त्रेभ्यो बहुलं॥ कृतलब्धक्रीतकुशलाः॥ प्रायभवः॥ उपजानूपकर्णोपनी
वेष्ठक्॥ २॥ संभूते॥ कोशाड्ढञ्॥ कालात्साधुपुष्प्यत्पच्यमानेषु॥ उप्ते च॥
आश्वयुज्या वुञ्॥ ग्रीष्मवसंतादन्यतरस्यां॥ देयमृणे॥ कलाप्यश्वत्थयवबुसाद्वुन्॥ ३२
ग्रीष्मावरसमाद्वुञ्॥ संवत्सराग्रहायणीभ्यां ठञ्च॥ व्याहरति मृगः॥ तदस्य सो
ढं॥ तत्र भवः॥ दिगादिभ्यो यत्॥ शरीरावयवाच्च॥ दृतिकुक्षिकलशिवस्त्यस्त्यहे

ठञ्॥ ग्रीवाभ्योण्च॥ गंभीराञ्ञ्यः॥ अव्ययीभावाच्च॥ अंतःपूर्वपदाट्ठञ्॥ ३॥ ग्रा
मात्पर्यनुपूर्वात्॥ जिह्वामूलांगुलेश्छः॥ वर्गांताच्च॥ अशब्दे यत्खावन्यतरस्यां॥
कर्णललाटात्कनलंकारे॥ तस्यव्याख्यान इति च व्याख्यातव्यनाम्नः॥ बह्वचोंतोदा
त्ताट्ठञ्॥ क्रतुयज्ञेभ्यश्च॥ अध्यायेष्वेवर्षेः॥ पौरोडाशपुरोडाशात्ष्ठन्॥ छंदसो
यदणौ॥ द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्॥ अणृगयना
दिभ्यः॥ तत आगतः॥ ठगायस्थानेभ्यः॥ शुंडिकादिभ्योण्॥ विद्यायोनिसंबंधेभ्यो
वुञ्॥ ऋतष्ठञ्॥ पितुर्यच्च॥ गोत्रादंकवत्॥ ४॥ हेतुमनुष्येभ्योऽन्यतरस्यांरूप्यः॥ म
यट्च॥ प्रभवति॥ विदूराञ्ञ्यः॥ तद्गच्छति पथिदूतयोः॥ अभिनिष्क्रामति द्वारं॥
अधिकृत्य कृते ग्रंथे॥ शिशुक्रंदयमसभद्वंद्वेंद्रजननादिभ्यश्छः॥ सोस्य निवासः॥

सू॰पा॰४ अभिजनश्च॥ आयुधजीविभ्यश्छः पर्वते॥ शंडिकादिभ्यो ञ्यः॥ सिंधुतक्षशिलादि
भ्योणञौ॥ तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः॥ भक्तिः॥ अचित्ताद्
३४ देशकालाट्ठक्॥ महाराजाट्ठञ्॥ वासुदेवार्जुनाभ्यां वुन्॥ गोत्रक्षत्रियाख्येभ्यो बहुलं
34 वुञ्॥ जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने॥ ५॥ तेन प्रोक्तं॥
तित्तिरिवरतंतुखंडिकोखाच्छण्॥ काश्यपकौशिकाभ्यामृषिभ्यां णिनिः॥ कलापि
वैशंपायनांतेवासिभ्यश्च॥ पुराणप्रोक्तेषु ब्राह्मणकल्पेषु॥ शौनकादिभ्यश्छंदसि॥
कठचरकाल्लुक्॥ कलापिनोण्॥ छगलिनो ढिनुक्॥ पाराशर्यशिलालिभ्यां भिक्षु
नटसूत्रयोः॥ कर्मंदकृशाश्वादिनिः॥ तेनैकदिक्॥ तसिश्च॥ उरसोयच्च॥ उपज्ञाते॥ ३४
कृते ग्रंथे॥ संज्ञायां॥ कुलालादिभ्यो वुञ्॥ क्षुद्राभ्रमरवटरवातपादञ्॥ तस्येदं॥ ६॥

रथाद्यत्॥ पत्त्रपूर्वादञ्॥ पत्त्राध्वर्युपरिषदश्च॥ हलसीराट्ठक्॥ द्वंद्वाद्वुन्वैरमैथुनि
कयोः॥ गोत्रचरणाद्वुञ्॥ संघांकलक्षणेष्वञ्यञिञामण्॥ शाकलाद्वा॥ छंदोगौ
क्थिकयाज्ञिकबह्वृचनटांयः॥ नदंडमाणवांतेवासिषु॥ रैवतिकादिभ्यश्छः॥
कौपिंजलहास्तिपदादण्॥ आथर्वणिकस्येकलोपश्च॥ तस्यविकारः॥ अवय
वेचप्राण्योषधिवृक्षेभ्यः॥ बिल्वादिभ्योण्॥ कोपधाच्च॥ त्रपुजतुनोःषुक्॥ ओ
रञ्॥ अनुदात्तादेश्च॥ ७॥ पलाशादिभ्योवा॥ शम्याष्ट्लञ्॥ मयड्वैतयोर्भाषाया
मभक्ष्याच्छादनयोः॥ नित्यंवृद्धशरादिभ्यः॥ गोश्चपुरीषे॥ पिष्टाच्च॥ संज्ञायां
कन्॥ व्रीहेःपुरोडाशे॥ असंज्ञायांतिलयवाभ्यां॥ द्व्यचश्छंदसि॥ नोत्वद्वर्ध्रबि
ल्वात्॥ तालादिभ्योण्॥ जातरूपेभ्यःपरिमाणे॥ प्राणिरजतादिभ्योञ्॥ ञित

सू॰पा॰४ श्चतत्प्रत्ययात्॥ क्रीतवत्परिमाणात्॥ उष्ट्राद्वुञ्॥ उमोर्णयोर्वा॥ एण्याढञ्॥ गो
३५ पयसोर्यत्॥ ८॥ द्रोश्च॥ मानेवयः॥ फलेलुक्॥ प्लक्षादिभ्योण्॥ जंब्वावा॥ लुप्च॥ ह
रीतक्यादिभ्यश्च॥ कंसीयपरशव्ययोर्यञञौलुक्च॥ २॥ ॥ युष्मड्ढेमंतात्संभूतेग्रा
35 माड्ढूतुतेनरथात्पलाशादिभ्योड्ढोश्चाष्टौ॥ ॥ इतिसूत्रपाठेचतुर्थाध्यायस्यतृ
तीयःपादः॥ ॥ प्राग्वहतेष्ठक्॥ तेनदीव्यतिखनतिजयतिजितं॥ संस्कृतं॥ कुल
त्थकोपधादण्॥ तरति॥ गोपुच्छाट्ठञ्॥ नौद्व्यचष्ठन्॥ चरति॥ आकर्षात्ष्ठल्॥
पर्पादिभ्यः ष्ठन्॥ श्वगणाट्ठञ्च॥ वेतनादिभ्योजीवति॥ वस्नक्रयविक्रयाट्ठन्॥ ३५
आयुधाच्छच॥ हरत्युत्संगादिभ्यः॥ भस्त्रादिभ्यः ष्ठन्॥ विभाषाविवधवी
वधात्॥ अण्कुटिलिकायाः॥ निर्वृत्तेक्षद्यूतादिभ्यः॥ क्रेर्मम्नित्यं॥ १॥ अपमि

त्ययाचिताभ्यां कक्कनौ ॥ संसृष्टे ॥ चूर्णादिनिः ॥ लवणाल्लुक् ॥ मुद्गादण् ॥ व्यं
जनैरुपसिक्ते ॥ ओजः सहोम्भसा वर्त्तते ॥ तत्प्रत्यनुपूर्वमीपलोमकूलं ॥ परिमुखं च ॥ प्र
यच्छति गर्ह्यं ॥ कुसीददशैकादशात्ष्ठन्ष्ठचौ ॥ उंछति ॥ रक्षति ॥ शब्ददर्दुरं करोति ॥ प
क्षिमत्स्यमृगान्हंति ॥ परिपंथं च तिष्ठति ॥ माथोत्तरपदपदव्यनुपदं धावति ॥
आक्रंदाट्ठञ्च ॥ पदोत्तरपदं गृह्णाति ॥ प्रतिकंठार्थललामं च ॥ २ ॥ धर्मं चरति ॥ प्रति
पथमेति ठँश्च ॥ समवायान्समवैति ॥ परिषदो ण्यः ॥ सेनाया वा ॥ संज्ञायां ललाट
कुक्कुट्यौ पश्यति ॥ तस्य धर्म्यं ॥ अण्महिष्यादिभ्यः ॥ ऋतोञ् ॥ अवक्रयः ॥ त
दस्य पण्यं ॥ लवणाट्ठञ् ॥ किसरादिभ्यः ष्ठन् ॥ शलालुनोन्यतरस्यां ॥
शिल्पं ॥ मड्डुकझर्झरादणन्यतरस्यां ॥ प्रहरणं ॥ परश्वधाट्ठञ्च ॥ शक्तिय

सू॰ पा॰ ४ ष्ठ्योरीकक्॥ अस्ति नास्ति दिष्टं मतिः॥ ३॥ शीलं॥ छत्रादिभ्यो णः॥ कर्माध्ययने
वृत्तं॥ बह्वच्पूर्वपदाट्ठच्॥ हितं भक्षाः॥ तदस्मै दीयते नियुक्तं॥ श्राणामांसौदना
३६ ट्टिठन्॥ भक्तादणन्यतरस्यां॥ तत्र नियुक्तः॥ अगारांताट्ठन्॥ अध्यायिन्यदेशका
30 लात्॥ कठिनांतप्रस्तारसंस्थानेषु व्यवहरति॥ निकटे वसति॥ आवसथात्ष्ठल्॥ प्राग्घि
ताद्यत्॥ तद्वहति रथयुगप्रासंगं॥ धुरो यड्ढकौ॥ खः सर्वधुरात्॥ एकधुराल्लुक्च॥ श
कटादण्॥ ४॥ हलसीराट्ठक्॥ संज्ञायां जन्याः॥ विध्यत्यधनुषा॥ धनगणं लब्धा॥
अन्नाण्णः॥ वशं गतः॥ पदमस्मिन्दृश्यं॥ मूलमस्याबर्हि॥ संज्ञायां धेनुष्या॥
गृहपतिना संयुक्ते ञ्यः॥ नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्य ३६
प्राप्यवध्यानाम्यसमसमितसंमितेषु॥ धर्मपथ्यर्थन्यायादनपेते॥ छंदसो नि

र्मिते॥उरसोण्च॥ हृदयस्यप्रियः॥ बंधनेचर्षौ॥ मतजनहलात्करणजल्पक
र्षेषु॥तत्रसाधुः॥ प्रतिजनादिभ्यःखञ्॥ भक्ताण्णः॥ ५॥ परिषदोण्यः॥
कथादिभ्यःष्ठक्॥ गुडादिभ्यःष्ठञ्॥ पथ्यतिथिवसतिस्वपतेर्ढञ्॥ सभायायः॥ ढ
श्छंदसि॥ समानतीर्थेवासी॥ समानोदरेशयितओचोदात्तः॥ सोदराद्यः॥ भवेछंदसि॥
पाथोनदीभ्यांड्यण्॥ वेशंतहिमवद्भ्यामण्॥ स्रोतसोविभाषाड्यड्ड्यौ॥ सगर्भ
सयूथसनुताद्यत्॥ तुग्राद्घन्॥ अग्राद्यत्॥ घच्छौच॥ समुद्राभ्राद्घः॥ बर्हिषिद
त्तं॥ दूतस्यभागकर्मणी॥ ६॥ रक्षोयातूनांहननी॥ रेवतीजगतीहविष्याभ्यःप्रश
स्ये॥ असुरस्यस्वं॥ मायायामण्॥ तद्वानासामुपधानोमंत्रइतीष्टकासुलुक्म
तोः॥ अश्विमानण्॥ वयस्यासुमूर्ध्नोमतुप्॥ मत्वर्थेमासतन्वोः॥ मधोर्ञच॥ ओजसो

सू॰पा॰४ हं नियतवो ॥ वेशोयशआदेर्भगाद्यल् ॥ खच ॥ पूर्वैः कृतमिनयौच ॥ अद्भिः संस्कृतं ॥
सहस्रेण संमितौ घः ॥ मतौच ॥ सोममर्हति यः ॥ मयेच ॥ मधोः ॥ वसोः समूहेच ॥ ७ ॥
३७ नक्षत्राद्घः ॥ सर्वदेवात्तातिल् ॥ शिवशमरिष्टस्य करे ॥ भावेच ॥ ८ ॥ ॥ प्राग्वहतेरषमि
37 त्यधर्मशीलं हलपरिषद्दोरक्षोनक्षत्रांश्चत्वारि ॥ ॥ इति चतुर्थाध्यायस्य चतुर्थः पा
दः ॥ ॥ इति सूत्रपाठे चतुर्थोऽध्यायः समाप्तः ॥ ॥ हरिः ॐ ३ ॥ ॥ प्राक्क्रीताच्छः ॥ उग
वादिभ्यो यत् ॥ कंबलाच्च संज्ञायां ॥ विभाषा हविरपूपादिभ्यः ॥ तस्मै हितं ॥ शरीराव
यवाद्यत् ॥ खलयवमाषतिलवृषब्रह्मणश्च ॥ अजाविभ्यां थ्यन् ॥ आत्मन्विश्वज ३७
नभोगोत्तरपदात्खः ॥ सर्वपुरुषाभ्यां णढञौ ॥ माणवचरकाभ्यां खञ् ॥ तदर्थं वि
कृतेः प्रकृतौ ॥ छदिरुपधिबलेर्ढञ् ॥ ऋषभोपानहोर्ञ्यः ॥ चर्मणोऽञ् ॥ तदस्यतद

स्मिं न्नत्याददिति॥ परिखायाढञ्॥ प्राग्वतेष्ठञ्॥ आर्हादगोपुच्छसंख्यापरिमाणाट्ठ
क्॥ असमासेनिष्कादिभ्यः॥ १॥ शताच्चठन्यतावशते॥ संख्याया अतिशदंतायाः क
न्॥ वतोरिड्वा॥ विंशतित्रिंशद्भ्यां ड्वुन संज्ञायां॥ कंसाट्टिठन्॥ शूर्पादञ न्यतरस्यां॥
शतमानविंशतिकसहस्रवसनादण्॥ अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायां॥ विभाषाका
र्षापणसहस्राभ्यां॥ द्वित्रिपूर्वान्निष्कात्॥ बिस्ताच्च॥ विंशतिकात्खः॥ खार्याईकन्॥ प
णपादमाषशताद्यत्॥ शाणाद्वा॥ द्वित्रिपूर्वादण्च॥ तेनक्रीतं॥ तस्यनिमित्तंसंयोगो
त्पातौ॥ गोद्व्चोसंख्यापरिमाणाश्वादेर्यत्॥ पुत्राच्छच॥ २॥ सर्वभूमिपृथिवीभ्या
मणञौ॥ तस्येश्वरः॥ तत्रविदितइतिच॥ लोकसर्वलोकाभ्यांठञ्॥ तस्यवापः॥ पा
त्रात्ष्ठन्॥ तदस्मिन्वृद्ध्यायलाभशुल्कोपधाँदीयते॥ पूरणार्धाट्ठन्॥ भागाद्य

८८

स्त्र॰पा॰५ च्च॥ तद्धरति वहत्यावहति भाराद्वंशादिभ्यः॥ वस्नद्रव्याभ्यां ठन्कनौ॥ संभवत्यव
३८ हरति पचति॥ आढकाचितपात्रात्खोन्यतरस्यां॥ द्विगोष्ठंश्च॥ कुलिजाल्लुक्खौ च॥ सो
स्यांशवस्नभृतयः॥ तदस्य परिमाणं॥ संख्यायाः संज्ञासंघसूत्राध्ययनेषु॥ पंक्ति
विंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतं॥ पंचद्दशतौ वर्गे वा॥
॥३॥ सप्तनोञ्छंदसि॥ त्रिंशच्चत्वारिंशतो ब्राह्मणे संज्ञायां डण्॥ तदर्हति॥ छेदादि
भ्यो नित्यं॥ शीर्षच्छेदाद्यच्च॥ दंडादिभ्यो यः॥ छंदसि च॥ पात्राद्घंश्च॥ कडंगरदक्षिणा
च्छ च॥ स्थालीबिलात्॥ यज्ञर्त्विग्भ्यां घखञौ॥ पारायणतुरायणचांद्रायणं व ३८
र्तयति॥ संशयमापन्नः॥ योजनं गच्छति॥ पथः ष्कन्॥ पंथो ण नित्यं॥ उत्त
रपथेनाहृतं च॥ कालात्॥ तेन निर्वृत्तं॥ तमधीष्टो भृतो भूतो भावी॥ ४॥ मा

साद्वयसियत्खञौ॥ द्विगोर्यप्॥ षण्मासाण्ण्यच्च॥ अवयसिठँश्च॥ समायाः खः॥ द्वि
गोर्वा॥ रात्र्यहःसंवत्सराच्च॥ वर्षाल्लुक्च॥ चित्तवतिनित्यं॥ षष्टिकाः षष्टिरात्रेण
पच्यंते॥ वत्सरांताच्छश्छंदसि॥ संपरिपूर्वात्खच॥ तेनपरिजय्यलभ्यकार्यसुकरं॥
तदस्यब्रह्मचर्यं॥ तस्यचदक्षिणायज्ञाख्येभ्यः॥ तत्रचदीयतेकार्यंभववत्॥ व्यु
ष्टादिभ्योण्॥ तेनयथाकथाचहस्ताभ्यांणयतौ॥ संपादिनि॥ कर्मवेषाद्यत्॥ ५॥
तस्मैप्रभवतिसंतापादिभ्यः॥ योगाद्यच्च॥ कर्मणउकञ्॥ समयस्तदस्यप्राप्तं॥ ऋतो
रण्॥ छंदसिघस्॥ कालाद्यत्॥ प्रकृष्टेठञ्॥ प्रयोजनं॥ विशाखाषाढादण्मंथदंडयोः॥
अनुप्रवचनादिभ्यश्छः॥ समापनात्सपूर्वपदात्॥ ऐकागारिकट्चौरे॥ आकालिकडाद्यं
तवचने॥ तेनतुल्यंक्रियाचेद्वतिः॥ तत्रतस्येव॥ तदर्हं॥ उपसर्गाच्छंदसिधात्वर्थे॥ तस्यभा

सू॰पा॰५ वस्त्वतलौ॥ आचुत्वात्॥ ६॥ ननञ्पूर्वात्तत्पुरुषाच्चतुरसंगतलवणवटबुधकतरसल
सेभ्यः॥ पृथ्वादिभ्यइमनिज्वा॥ वर्णदृढादिभ्यः ष्यञ्च॥ गुणवचनब्राह्मणादिभ्यः कर्म
३९ णिच॥ स्तेनाद्यन्नलोपश्च॥ सख्युर्यः॥ कपिज्ञात्योर्ढक्॥ पत्यंतपुरोहितादिभ्योयक्॥ प्रा
णभृज्जातिवयोवचनोद्गात्रादिभ्योञ्॥ हायनांतयुवादिभ्योण्॥ इगंताच्चलघुपूर्वात्॥
योपधाद्गुरूपोत्तमाद्वुञ्॥ द्वंद्वमनोज्ञादिभ्यश्च॥ गोत्रचरणाच्छ्लाघात्याकारतदवेते
षु॥ होत्राभ्यश्छः॥ ब्रह्मणस्त्वः॥ ७॥ ॥ प्राक्क्रीताच्छता त्सर्वभूमिसप्तनो आसात्तस्मै
प्रभवतिन नञ्पूर्वात्षोडश॥ ॥इति पंचमाध्यायस्य प्रथमः पादः॥ ॥धान्यानांभव
नेक्षेत्रेखञ्॥ व्रीहिशाल्योर्ढक्॥ यवयवकषष्टिकाद्यत्॥ विभाषातिलमाषोमा ३९
भंगाणुभ्यः॥ सर्वचर्मणः कृतः खखञौ॥ यथामुखसंमुखस्यदर्शनः खः॥

तत्सर्वादेः पथ्यंग कर्मपत्रपात्रं व्याप्नोति॥ आप्रपदं प्राप्नोति॥ अनुपदसर्वा
न्नायानयं बद्धाभक्षयति नेयेषु॥ परोवर परंपर पुत्रपौत्र मनुभवति॥ अ
वारपारात्यंतानुकामंगामी॥ समांसमां विजायते॥ अद्यश्वीनावष्टब्धे॥ आ
गवीनः॥ अनुग्वलं गामी॥ अध्वनोयत्खौ॥ अभ्यमित्रा च्छच॥ गोष्ठात्
खञ्भूतपूर्वे॥ अश्वस्यैकाहगमः॥ शालीनकौपीने अधृष्टाकार्ययोः॥
॥१॥ व्रातेन जीवति॥ साप्तपदीनं सख्यं॥ हैयंगवीनं संज्ञायां॥ तस्यपाकमूले
पील्वादिकर्णादिभ्यः कुणब्जाहचौ॥ पक्षात्तिः॥ तेन वित्तश्चुंचुप्चणपौ॥ वि
नञ्भ्यां नानायौ नसह॥ वेः शालच्छंकटचौ॥ संप्रोदश्चकटच्॥ अवात्कुटा
रच्च॥ नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः॥ नेर्बिडज्बिरीसचौ॥

सू·पा·५ इनच्पिटच्चिकचिच॥ उपाधिभ्यांत्यकंनासन्नारूढयोः॥ कर्मणिघटोठच्॥
तदस्यसंजातंतारकादिभ्यइतच्॥ प्रमाणेद्वयसज्दघ्नञ्मात्रचः॥ पुरुषहस्ति
४० भ्यामण्च॥ यत्तदेतेभ्यःपरिमाणेवतुप्॥ किमिदंभ्यांवोघः॥२॥ किमःसंख्या
५० परिमाणेडतिच॥ संख्यायाअवयवेतयप्॥ द्वित्रिभ्यांतयस्यायज्वा॥ उभादु
दात्तोनित्यं॥ तदस्मिन्नधिकमितिदशांताड्डः॥ शदंतविंशतेश्च॥ संख्यायागुण
स्यनिमानेमयट्॥ तस्यपूरणेडट्॥ नांतादसंख्यादेर्मट्॥ थट्चछंदसि॥ षट्क
तिकतिपयचतुरांथुक्॥ बहुपूगगणसंघस्यतिथुक्॥ वतोरिथुक्॥ द्वेस्तीयः॥ ४०
त्रेःसंप्रसारणंच॥ विंशत्यादिभ्यस्तमडन्यतरस्यां॥ नित्यंशतादिमासार्धमा
ससंवत्सराच्च॥ षष्ट्यादेश्चासंख्यादेः॥ मतौछःसूक्तसाम्नोः॥ अध्यायाऽनुवा

कयोर्लुक्॥३॥विमुक्तादिभ्योण्॥ गोषदादिभ्योवुन्॥तत्रकुशलः पथः॥आक
र्षादिभ्यः कन्॥धनहिरण्यात्कामे॥ स्वांगेभ्यः प्रसिते॥उदराट्ठगाद्यूने॥ सस्येन
परिजातः॥ अंशंहारी॥तंत्रादचिरापहृते॥ ब्राह्मणकोष्णिके संज्ञायां॥ शीतोष्णा
भ्यांकारिणि॥अधिकं॥ अनुकाभिकाभीकः कमिता॥ पार्श्वेनान्विच्छति॥अयः
शूल दंडाजिनाभ्यांठकूठञौ॥ तावतिथंग्रहणमितिलुग्वा॥ सएषां ग्रामणीः॥ शृं
खलमस्यबंधनंकरभे॥उत्कउन्मनाः॥४॥कालप्रयोजनाद्रोगे॥ तदस्मिन्नन्नंप्रायेसंज्ञा
यां॥कुल्माषादञ्॥ श्रोत्रियंश्छंदोधीते॥श्राद्धमनेन भुक्तमिनिठनौ॥पूर्वादिनिः॥स
पूर्वाच्च॥इष्टादिभ्यश्च॥ छंदसिपरिपंथिपरिपरिणौपर्यवस्थातरि॥अनुपद्यन्वेष्टा॥
साक्षाद्द्रष्टरि संज्ञायां॥ क्षेत्रियच्परक्षेत्रे चिकित्स्यः॥ इंद्रियमिंद्रलिंगमिंद्रदृष्टमिंद्रसृ

सू॰पा॰५ ष्टमिंद्रजुष्टमिंद्रदत्तमितिवा॥ तदस्यास्त्यस्मिन्निति मतुप्॥ रसादिभ्यश्च॥ प्राणि
४१ स्थादातो लजन्यतरस्यां॥ सिध्मादिभ्यश्च॥ वत्सांसाभ्यां कामबले॥ फेनादिल
५१ च्च॥ लोमादिपामादिपिच्छादिभ्यः शनेलचः॥५॥ प्रज्ञाश्रद्धार्चावृत्तिभ्योणः॥
तपः सहस्राभ्यां विनीनी॥ अण्च॥ सिकताशर्कराभ्यांच॥ देशे लुबिलचौच॥
दंतउन्नतउरच्॥ ऊषशुषिमुष्कमधोरः॥ द्युद्रुभ्यां मः॥ केशाद्वोन्यतरस्यां॥
गांड्यजगात्संज्ञायां॥ कांडांडादीरन्नीरचौ॥ रजः कृष्यासुतिपरिषदोवल
च्॥ दंतशिखात्संज्ञायां॥ ज्योत्स्नातमिस्राशृंगिणोर्जस्विन्नूर्जस्वलगोमि
न्मलिनमलीमसाः॥ अतइनिठनौ॥ व्रीह्यादिभ्यश्च॥ तुंदादिभ्यइलच्च॥ ४१
एकगोपूर्वाट्ठञ्नित्यं॥ शतसहस्रांताच्चनिष्कात्॥ रूपादाहतप्रशंसयोर्यप्॥

॥६॥ अस्मायामेधास्रजो विनिः ॥ बहुलं छंदसि ॥ ऊर्णाया युस् ॥ वाचो ग्मिनिः ॥
आलजाटचौ बहुभाषिणि ॥ स्वामिन्नैश्वर्ये ॥ अर्श आदिभ्योऽच् ॥ द्वंद्वोपतापग
र्ह्यात्प्राणिस्थादिनिः ॥ वातातीसाराभ्यां कुक्च ॥ वयसि पूरणात् ॥ सुखादिभ्यश्च ॥
धर्मशीलवर्णांताच्च ॥ हस्ताज्जातौ ॥ वर्णाद्ब्रह्मचारिणि ॥ पुष्करादिभ्यो देशे ॥ ब
लादिभ्यो मतुबन्यतरस्यां ॥ संज्ञायां मन्माभ्यां ॥ कंशंभ्यां बभयुस्तितुतयसः ॥
तुंदिवलिवटेर्भः ॥ अहंशुभमोर्युस् ॥७॥ ॥धान्यानांभातेनकिमोविमुक्तकालप्रज्ञा
स्मायामेधाविंशतिः ॥ ॥इतिपंचमाऽध्यायस्य द्वितीयः पादः ॥ ॥प्राग्दिशो विभक्तिः ॥
किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ॥ इदम इश् ॥ एतेतौ रथोः ॥ एतदोऽन् ॥ सर्वस्य सो
ऽन्यतरस्यां दि ॥ पंचम्यास्तसिल् ॥ तसेश्च ॥ पर्यभिभ्यां च ॥ सप्तम्यास्त्रल् ॥ इदमो

स.पा.५ हः।। किमोत्।। वाहच छंदसि।। इतराभ्योपिदृश्यंते।। सर्वैकान्यकिंयत्तदःकालेदा।।
४२ इदमोर्हिल्।। अधुना।। दानीं च।। तदोदाच।। तयोर्दार्हिलौच छंदसि।। ३।। अनद्यतने
र्हिलन्यतरस्यां।। सद्यःपरुत्परार्यैषमः परेद्यवद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरे
42 द्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः।। प्रकारवचनेथाल्।। इदमस्थमुः।। किम
श्च।। था हेतौ च छंदसि।। दिक्शब्देभ्यः सप्तमीपंचमीप्रथमाभ्योदिग्देशका
लेष्वस्तातिः।। दक्षिणोत्तराभ्यामतसुच्।। विभाषापरावराभ्यां।। अंचेर्लुक्।। उ
पर्युपरिष्टात्।। पश्चात्।। पश्चपश्चा च छंदसि।। उत्तराधरदक्षिणादातिः।। एन ४२
बन्यतरस्यामदूरेपंचम्याः।। दक्षिणादाच्।। आहि च दूरे।। उत्तराच्च।। पूर्वाधराव
राणामसिपुरधवश्चैषां।। अस्ताति च।। २।। विभाषावरस्य।। संख्याया विधार्थे

धा॥ अधिकरणविचाले च॥ एकाद्धो ध्यमुञन्यतरस्यां॥ द्वित्र्योश्च धमुञ्॥ एधाच्च॥
याप्ये पाशप्॥ पूरणाद्भागे तीयादन्॥ प्रागेकादशभ्यो छंदसि॥ षष्ठाष्टमाभ्यां ञ च॥
मानपश्वंगयोः कन्लुकौ च॥ एकादाकिनिच्चासहाये॥ भूतपूर्वे चरट्॥ षष्ठ्या रूप्य
च॥ अतिशायने तमबिष्ठनौ॥ तिङश्च॥ द्विवचनविभज्योपपदे तरबीयसुनौ॥ अजा
दी गुणवचनादेव॥ तुश्छंदसि॥ प्रशस्यस्य श्रः॥ ३॥ ज्य च॥ वृद्धस्य च॥ अंतिकबाढ
योर्नेदसाधौ॥ युवाल्पयोः कनन्यतरस्यां॥ विन्मतोर्लुक्॥ प्रशंसायां रूपप्॥ ईषदस
माप्तौ कल्पब्देश्यदेशीयरः॥ विभाषा सुपो बहुच्पुरस्तात्तु॥ प्रकारवचने जातीय
र्॥ प्रागिवात्कः॥ अव्ययसर्वनाम्नामकच् प्राक् टेः॥ कस्य च दः॥ अज्ञाते॥ कुत्सि
ते॥ संज्ञायां कन्॥ अनुकंपायां॥ नीतौ च तद्युक्तात्॥ बह्वचो मनुष्यनाम्नः ष्ठ

सू.पा.५ ञ्चा॥ घनिलचौच॥ प्राचामुपादेरडज्वुचौच॥ ४॥ जातिनाम्नः कन्॥ अजिनांत
४२ स्योत्तरपदलोपश्च॥ ठाजादावूर्ध्वंद्वितीयादचः॥ शेवलसुपरिविशालवरुणार्यमा
43 दीनांतृतीयात्॥ अल्पे॥ ह्रस्वे॥ संज्ञायांकन्॥ कुटीशमीशुंडाभ्योरः॥ कुत्वाडुप
च्॥ कासूगोणीभ्यांष्टरच्॥ वत्सोक्षाश्वर्षभेभ्यश्चतनुत्वे॥ किंयत्तदोनिर्धारणेद्व
योरेकस्यडतरच्॥ वाबहूनांजातिपरिप्रश्नेडतमच्॥ एकाच्चप्राचां॥ अवक्षेपणे
कन्॥ इवेप्रतिकृतौ॥ संज्ञायांच॥ लुंमनुष्ये॥ जीविकार्थेचापण्ये॥ देवपथादिभ्य
श्च॥ ५॥ वस्तेर्ढञ्॥ शिलायाढः॥ शाखादिभ्योयः॥ द्रव्यंचभव्ये॥ कुशाग्राच्छः॥
समासाच्चतद्विषयात्॥ शर्करादिभ्योण्॥ अंगुल्यादिभ्यःठक्॥ एकशालायाष्ठ ४२
जन्यतरस्यां॥ कर्कलोहितादीकक्॥ प्रत्नपूर्वविश्वेमात्थाल्छंदसि॥ पूगांयोग्रा

मणीवर्वात्॥ व्रातच्फञोरस्त्रियां॥ आयुधजीविसंघाञ्ञ्यड्वाहीकेष्वब्राह्म
णराजन्यात्॥ वृकाट्टेण्यण्॥ दामन्यादित्रिगर्तषष्ठाच्छः॥ पर्श्वादियौधेया
दिभ्यामणञौ॥ अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छुमदणो
यञ्॥ ञ्यादयस्तद्राजाः॥ ३॥ ॥ प्राग्दिशो ऽनद्यतनेर्विभाषाज्यचजातिनाम्नो
नस्तेरेकोनविंशतिः॥ ॥ इतिपंचमाध्यायस्यतृतीयः पादः॥ ॥ पादशातस्यसंख्या
देर्वीप्सायांवुन्लोपश्च॥ दंडव्यवसर्गयोश्च॥ स्थूलादिभ्यः प्रकारवचनेकन्॥ अन
त्यंतगतौक्तात्॥ नसामिवचने॥ बृहत्याआच्छादने॥ अषडक्षाशितंग्वलंकर्मा
लंपुरुषाध्युत्तरपदात्खः॥ विभाषांचेरदिक्स्त्रियां॥ जात्यंताच्छबंधुनि॥
स्थानांताद्विभाषासस्थानेनेतिचेत्॥ किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे॥ अमु

स्व॰पा॰५ च्छंदसि॥ अनुगादिनः ठक्॥ णचः स्त्रियामञ्॥ अणिनुणः॥ विसारिणो
मत्स्ये॥ संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्॥ द्वित्रिचतुर्भ्यः सुच्॥
४४ एकस्य सकृच्च॥ विभाषा बहोर्धाविप्रकृष्टकाले॥ ३॥ तत्प्रकृतवचने मयट्॥
44 समूहवच्च बहुषु॥ अनंतावसथेतिहभेषजाञ्ञ्यः॥ देवतांतात्तादर्थ्ये य
त्॥ पादार्घाभ्यां च॥ अतिथेर्ञ्यः॥ देवात्तल्॥ अवेः कः॥ यावादिभ्यः कन्॥ लो
हितान्मणौ॥ वर्णे चानित्ये॥ रक्ते॥ कालाच्च॥ विनयादिभ्यः ठक्॥ वाचो व्या
हृतार्थायां॥ तद्युक्तात्कर्मणोऽण्॥ ओषधेरजातौ॥ प्रज्ञादिभ्यश्च॥ मृ ४४
दस्तिकन्॥ सस्नौ प्रशंसायां॥ २॥ वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छंदसि॥
बह्वल्पार्थाच्छस्कारकादन्यतरस्यां॥ संख्यैकवचनाच्च वीप्सायां॥ प्रतियो

गेपंचम्यास्तसिः॥ अपादानेचाहीयरुहोः॥ अतिग्रहाव्यथनक्षेपेष्वक
र्तरितृतीयायाः॥ हीयमानपापयोगाच्च॥ षष्ठ्याव्याश्रये॥ रोगाच्चापनयने॥
अभूततद्भावे कृभ्वस्तियोगेसंपद्यकर्तरिच्विः॥ अरुर्मनश्चक्षुश्चेतोरहोरज
सांलोपश्च॥ विभाषासातिकात्स्न्र्ये॥ अभिविधौसंपदाच॥ तदधीनवचने॥ देयेत्रा
च॥ देवमनुष्यपुरुषपुरुमर्त्येभ्योद्वितीयासप्तम्योर्बहुलं॥ अव्यक्तानुकरणा
द्यजवरार्धादनितौडाच्॥ कृञोद्वितीयतृतीयशंबबीजात्कृषौ॥ संख्यायाश्चगु
णांतायाः॥ समयाच्चयापनायां॥ ३॥ सपत्रनिष्पत्रादतिव्यथने॥ निष्कुलान्नि
ष्कोषणे॥ सुखप्रियादानुलोम्ये॥ दुःखात्प्रातिलोम्ये॥ शूलात्पाके॥ सत्यादशपथे॥
मद्रात्परिवापणे॥ समासांताः॥ नपूजनात्॥ किमःक्षेपे॥ नञस्तत्पुरुषात्॥ प

स्तः पा॰ ५
४५
45

थोविभाषा॥ बहुव्रीहो संख्येयेडजबहुगणात्॥ ऋक्पूरब्धूःपथामानक्षे॥ अ
चूप्रत्यन्वपूर्वात्सामलोम्नः॥ अक्ष्णोदर्शनात्॥ अचतुरविचतुरसुचतुरस्त्री
पुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिं
दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धो
क्षोपशुनगोष्ठश्वाः॥ ब्रह्महस्तिभ्यांवर्चसः॥ अवसमंधेभ्यस्तमसः॥ श्वसोवसीयः
श्रेयसः॥४॥ अन्ववतप्ताद्रहसः॥ प्रतेरुरसः सप्तमीस्थात्॥ अनुगवमायामे॥
द्विस्तावात्रिस्तावावेदिः॥ उपसर्गादध्वनः॥ तत्पुरुषस्यांगुलेः संख्याव्ययादेः॥
अहः सर्वैकदेशसंख्यातपुण्याच्चरात्रेः॥ अह्नोऽह्न एतेभ्यः॥ नसंख्यादेः समा ४५
हारे॥ उत्तमैकाभ्यांच॥ राजाहःसखिभ्यःष्टच्॥ गोरतद्धितलुकि॥ अग्राख्या

याम्युरसः ॥ अनोश्मायःसरसां जातिसंज्ञयोः ॥ ग्रामकौटाभ्यां च तक्ष्णः ॥ अ
तेः शुनः ॥ उपमानादप्राणिषु ॥ उत्तरमृगपूर्वाच्च सक्थ्नः ॥ नावो द्विगोः ॥ अर्धाच्च ॥ ५ ॥
खार्याः प्राचां ॥ द्वित्रिभ्यामंजलेः ॥ अनसंतान्नपुंसकाच्छंदसि ॥ ब्रह्मणो जानपदाख्या
यां ॥ कुमहद्भ्यामन्यतरस्यां ॥ द्वंद्वाच्चुदषहांतात्समाहारे ॥ अव्ययीभावे शरत्प्र
भृतिभ्यः ॥ अनश्च ॥ नपुंसकादन्यतरस्यां ॥ नदीपौर्णमास्याग्रहायणीभ्यः ॥
झयः ॥ गिरेश्च सेनकस्य ॥ बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच् ॥ अंगुलेर्दारु
णि ॥ द्वित्रिभ्यां ष मूर्ध्नः ॥ अप्पूरणीप्रमाण्योः ॥ अंतर्बहिर्भ्यां च लोम्नः ॥ अ
ज्नासिकायाः संज्ञायां नसं चास्थूलात् ॥ उपसर्गाच्च ॥ सुप्रातसुश्वसुदिवशारि
कुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः ॥ ६ ॥ नञ्दुःसुभ्यो हलिसक्थ्योरन्यत

सू॰पा॰५ रस्यां॥ नित्यमसिच्प्रजामेधयोः॥ बहुप्रजाश्छंदसि॥ धर्मादनिच्केवलात्॥
४६ जंभासुहरिततृणसोमेभ्यः॥ दक्षिणेर्मा लुब्धयोगे॥ इच्कर्मव्यतिहारे॥ द्विदंड्या
दिभ्यश्च॥ प्रसंभ्यां जानुनोर्ज्ञुः॥ ऊर्ध्वाद्विभाषा॥ ऊधसोनङ्॥ धनुषश्च॥ वा
40 संज्ञायां॥ जायाया निङ्॥ गंधस्येदुत्पूतिसुसुरभिभ्यः॥ अल्पाख्यायां॥ उ
पमानाच्च॥ पादस्य लोपोहस्त्यादिभ्यः॥ कुंभपदीषु च॥ संख्यासुपूर्वस्य॥ ७॥
वयसि दंतस्य दतृ॥ छंदसि च॥ स्त्रियां संज्ञायां॥ विभाषा श्यावारोकाभ्यां॥ अ
ग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च॥ ककुदस्यावस्थायां लोपः॥ त्रिककुत्पर्वते॥ उ ४६
द्विभ्यां काकुदस्य॥ पूर्णाद्विभाषा॥ सुहृद्दुर्हृदौ मित्रामित्रयोः॥ उरःप्रभृति
भ्यः कप्॥ इनः स्त्रियां॥ नद्यृतश्च॥ शेषाद्विभाषा॥ न संज्ञायां॥ ईयसश्च॥ वंदि

तेश्चातुः॥ ऋतश्छंदसि॥ नाडी[illegible]ोः स्वांगे॥ निष्प्रवाणिश्च॥ ८॥ ॥ पादश्चातस्य
तत्प्रकृत वृकसपत्रान्चवखाया[illegible]वयसिविंशातिः॥ ॥ इतिपंचमाध्यायस्य
चतुर्थः पादः॥ ॥ इतिसूत्रपाठे पंच[illegible]ऽध्यायः समाप्तः॥ ॥ हरिः ॐ ३॥ ॥
एकाचोद्वेप्रथमस्य॥ अजादेर्द्वितीय[illegible]स्य॥ नंद्राः संयोगादयः॥ पूर्वोभ्यासः॥
उभेअभ्यस्तं॥ जक्षित्यादयः षट्॥ [illegible]ादी नांदी घोंभ्यासस्य॥ लिटि धातो
रनभ्यासस्य॥ सन्यङोः॥ श्लौ॥ चङि॥ [illegible]ान्त्साक्ष्रान्मीदुँश्च॥ ष्यङः संप्र
सारणंपुत्रपत्योस्तत्पुरुषे॥ बंधुनिबऊ[illegible]रे॥ वचिस्वपियजादी नांकिति॥ ग्र
हिज्यावयि व्यधिवष्टिविचति वृश्चतिप्छ[illegible]ज्जती नांङितिच॥ लिट्यभ्या
सस्योभयेषां॥ स्वापेश्चङि॥ स्वपिस्यामिव्ये[illegible]ङि॥ नवशः॥ १॥ चायःकी॥ स्फा

सं·पा·६ यः स्फी निष्ठायां॥ स्त्यः प्रपूर्वस्य॥ द्रवमूर्त्तिस्पर्शयोः श्यः॥ प्रतेश्च॥ विभाषाभ्य
४७ वपूर्वस्य॥ शृतं पाके॥ प्यायः पी॥ लिड्यङोश्च॥ विभाषाश्वेः॥ णौ च संश्चङोः॥
ह्वः संप्रसारणं॥ अभ्यस्तस्य च॥ बहुलं छन्दसि॥ चायः की॥ अपस्पृधेथा
मानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्त्तः॥ न संप्रसारणे
47 संप्रसारणं॥ लिटि वयो यः॥ वश्चास्यान्यतरस्यां किति॥ वेञः॥ २॥ ल्यपि च॥
ज्यश्च॥ व्यश्च॥ विभाषा परेः॥ आदेच उपदेशेऽशिति॥ न व्यो लिटि॥ स्फुरति
स्फुलत्योर्घञि॥ क्रीङ्जीनां णौ॥ सिध्यतेरपारलौकिके॥ मीनातिमिनोति ४७
दीङां ल्यपि च॥ विभाषा लीयतेः॥ खिदेश्छंदसि॥ अपगुरो णमुलि॥ चिस्फुरो
र्णौ॥ प्रजने वीयतेः॥ बिभेतेर्हेतुभये॥ नित्यं स्मयतेः॥ सृजिदृशोर्झल्यम

कि ति॥ अनुदात्तस्यचर्दुपधस्यान्यतरस्यां॥ शीर्षश्छंदसि॥३॥ येचतद्धिते॥
अचिशीर्षः॥ पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नास
ञ्छस्प्रभृतिषु॥ धात्वादेःषःसः॥ णोनः॥ लोपोव्योर्वलि॥ वेरपृक्तस्य॥ हल्ङ्
याभ्योदीर्घात्सुतिस्यपृक्तंहल्॥ एङ्ह्रस्वात्संबुद्धेः॥ शेश्छंदसिबहुलं॥
ह्रस्वस्यपितिकृतितुक्॥ संहितायां॥ छेच॥ आङ्माङोश्च॥ दीर्घात्॥ पदांता
द्वा॥ इकोयणचि॥ एचोयवायावः॥ वांतोयिप्रत्यये॥ धातोस्तंनिमित्तस्यैव॥
॥४॥ क्षय्यजय्यौशक्यार्थे॥ क्रय्यस्तदर्थे॥ भय्यप्रवय्येच छंदसि॥ एकः
पूर्वपरयोः॥ अंतादिवच्च॥ षत्वतुकोरसिद्धः॥ आद्गुणः॥ वृद्धिरेचि॥ ए
त्येधत्यूठ्सु॥ आटश्च॥ उपसर्गाद्दृतिधातौ॥ वासुप्यापिशलेः॥ ओतो

सू॰पा॰६ म्न्रा सोः॥ एङि पररूपं॥ ओमाङोश्च॥ उस्यपदांतात्॥ अतोगुणे॥ अव्य
४८ क्तानुकरणस्यातइतौ॥ नाम्रेडितस्यांत्यस्यतुवा॥ नित्यमाम्रेडिते डाचि॥ ५॥
५४ अकः सवर्णेदीर्घः॥ प्रथमयोः पूर्वसवर्णः॥ तस्माच्छसोनः पुंसि॥ नादिचि॥
दीर्घाज्जसिच॥ वाछंदसि॥ अमिपूर्वः॥ संप्रसारणाच्च॥ एङः पदांतादति॥
ङसिङसोश्च॥ ऋतउत्॥ ख्यत्यात्परस्य॥ अतोरोरप्लुतादप्लुते॥ हशिच॥
प्रकृत्यांतः पादमव्यपरे॥ अव्याददवद्याददवक्रमुरव्रतायमवंत्ववस्युषुच॥ य
जुष्युरः॥ आपोजुषाणोवृष्णोवर्षिष्ठेंबेऽबालेऽबिकेपूर्वे॥ अंगइत्यादौच॥ ४८
अनुदात्तेचकुधपरे॥ ६॥ अवपथासिच॥ सर्वत्रविभाषागोः॥ अवङ्
स्फोटायनस्य॥ इंद्रेचनित्यं॥ प्लुतप्रगृह्याअचि॥ आङोनुनासिकश्छंद

सि॥ इको सवर्णे शा कल्यस्यह्रस्वश्च॥ ऋत्यकः॥ अप्लुतवदुपस्थिते॥ ईचा
क्रवर्मणस्य॥ दिवउत्॥ एतत्तदोः सुलोपो कोरनञ्समासेहलि॥ स्यश्छंदसिब
ऊलं॥ सोचिलोपेचेत्पादपूरणं॥ सुट्कात्पूर्वः॥ अडभ्यासव्यवायेपि॥ संप
र्युपेभ्यः करोतौ भूषणे॥ समवायेच॥ उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु॥
किरतौलवने॥ ७॥ हिंसायांप्रतेश्च॥ अपाच्चतुष्पाच्छकुनिष्वालेखने॥ कु
स्तुंबुरूणिजातिः॥ अपरस्पराः क्रियासातत्ये॥ गोष्पदंसेविताऽसेवितप्रमा
णेषु॥ आस्पदंप्रतिष्ठायां॥ आश्चर्यमनित्ये॥ वर्चस्केवस्करः॥ अपस्करोरथां
गं॥ विष्किरः शकुनिर्विकिरोवा॥ ह्रस्वाच्चंद्रोत्तरपदेमंत्रे॥ प्रतिष्कशश्चकशेः॥
प्रस्कण्वहरिश्चंद्रा वृषी॥ मस्करमस्करिणौवेणुपरिव्राजकयोः॥ कास्तीरा

गो पाक

सू॰पा॰६ जस्तुंदेनगरे॥ कारस्करोवृक्षः॥ पारस्करप्रभृतीनिचसंज्ञायां॥ अनुदात्तंप
दमेकवर्जं॥ कर्षात्वतोघञोंतउदात्तः॥ उञ्छादीनांच॥८॥ अनुदात्तस्यचयत्रो
४९ दात्तलोपः॥ धातोः॥ चितः॥ तद्धितस्य॥ कितः॥ तिसृभ्योजसः॥ चतुरःशसि॥ सा
49 वेकाचस्तृतीयादिर्विभक्तिः॥ अंतोदात्ताउत्तरपदादन्यतरस्यामनित्यसमा
से॥ अंचेश्छंदस्यसर्वनामस्थानं॥ ऊडिदंपदाद्यप्पुम्रैद्युभ्यः॥ अष्टनोदीर्घा
त्॥ शतुरनुमोनद्यजादी॥ उदात्तयणोहल्पूर्वात्॥ नोङ्धात्वोः॥ ह्रस्वनुड्भ्यां
मतुप्॥ नामन्यतरस्यां॥ ङ्याश्छंदसिबहुलं॥ षट्त्रिचतुर्भ्योहलादिः॥ झल्यु
पोत्तमं॥९॥ विभाषाभाषायां॥ नगोश्वन्त्साववर्णराड्ङ्क्रुङ्कृद्भ्यः॥ ४९
दिवोझल्॥ नचान्यतरस्यां॥ तित्स्वरितं॥ तास्यनुदात्तेन्ङिदुपदेशाल्लसा

र्वधातुकमनुदात्तमन्ह्विङोः॥ आदिः सिचोन्यतरस्यां॥ स्वपादिहिंसामच्य
निटि॥ अभ्यस्तानामादिः॥ अनुदात्तेच॥ सर्वस्यसुपि॥ भीह्रीभृहुमदजन
धनदरिद्राजागराम्प्रत्ययात्पूर्वंपिति॥ लिति॥ आदिर्णमुल्यन्यतरस्यां॥ अ
चः कर्त्तर्यकि॥ थलिचसेटीडंतोवा॥ ञ्नित्यादिर्नित्यं॥ आमंत्रितस्यच॥ पथि
मथोः सर्वनामस्थाने॥ अंतश्चतवैयुगपत्॥ १०॥ क्षयोनिवासे॥ जयः करणं॥
वृषादीनांच॥ संज्ञायामुपमानं॥ निष्ठाचद्व्यजनात्॥ शुष्कधृष्टौ॥ आशितः
कर्त्ता॥ रिक्तेविभाषा॥ जुष्टार्पितेचछंदसि॥ नित्यंमंत्रे॥ युष्मदस्मदोर्ङसि॥ ङ
यिच॥ यतोनावः॥ ईडवंदवृशंसदुहांण्यतः॥ विभाषावेण्विंधानयोः॥ त्या
गरागहासकुहश्वठक्रथानां॥ उपोत्तमंरिति॥ चङ्यन्यतरस्यां॥ मतोःपूर्वमा

सू.पा.६ त्संज्ञायां स्त्रियां॥ अंतोवत्याः॥ ११॥ ईवत्याः॥ चौ॥ समासस्य॥ १२॥ ॥एका
चश्चायोल्यपिचयेच क्षय्यजय्यावकः सवर्णेऽवपथासिहिंसायामनुदात्त
५० स्यचविभाषा क्षयईवत्यास्त्रीणि॥ ॥इतिसूत्रपाठेषष्ठाऽध्यायस्यप्रथमः
पादः॥ ॥बऊत्री हौप्रकृत्यापूर्वपदं॥ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमा
नाव्ययद्वितीया कृत्याः॥ वर्णोवर्णेष्वनेते॥ गाधलवणयोः प्रमाणे॥ दाया
द्यंदायादे॥ प्रतिबंधिचिरकृछ्रयोः॥ पदेपदेशे॥ निवातेवातत्राणे॥ शारदे
नार्त्तवे॥ अध्वर्युकषाययोर्जातौ॥ सदृशप्रतिरूपयोः सादृश्ये॥ द्विगौप्र
माणे॥ गंतव्यपण्यंवाणिजे॥ मात्रोपज्ञोपक्रमछाये नपुंसके॥ सुखप्रि ५०
ययोर्हिते॥ प्रीतौच॥ स्वंस्वामिनि॥ पत्यावैश्वर्ये॥ नभूवाक्चिद्दिधि

षु॥ वा भुवनं॥ १॥ आशंकाबाधनेदीयःसु संभावने॥ पूर्वे भूतपूर्वे॥ सवि
धसनीडसमर्यादसवेशसदेशेषु सामीप्ये॥ विस्पष्टादीनि गुणवचनेषु॥
श्रज्यावमकन्पापवत्सु भावे कर्मधारये॥ कुमारश्च॥ आदिः प्रत्येनसि॥ पू
गेष्वन्यतरस्यां॥ इगंतकालकपालभगालशरावेषु द्विगौ॥ बह्वन्यतरस्यां॥
दिष्टिवितस्त्योश्च॥ सप्तमी सिद्धशुष्कपक्वबंधेष्वकालात्॥ परिप्रत्युपापा
वर्ज्यमानाऽहोरात्रावयवेषु॥ राजन्यबहुवचनद्वंद्वेऽन्धकवृष्णिषु॥ संख्या॥
आचार्योपसर्जनश्चांतेवासी॥ कार्त्तकौजपादयश्च॥ महान्व्रीह्यपराह्ण
गृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु॥ क्षुल्लकश्च वैश्वदेवे॥
उष्ट्रः सादिवाम्योः॥ २॥ गोः सादसादिसारथिषु॥ कुरुगार्हपतरिक्तगुर्वसूतज

स॰पा॰६ रत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूःपण्यकंबलोदासीभाराणांच॥

५१ चतुर्थीतदर्थे॥ अर्थे॥ क्तेच॥ कर्मधारयेनिष्ठा॥ अहीनेद्वितीया॥ तृतीया

51 कर्मणि॥ गतिरनंतरः॥ तादौचनितिकृत्यतौ॥ तवैचांतश्चयुगपत्॥ अनिगंतो

चतौवप्रत्यये॥ न्यधीच॥ ईषदन्यतरस्यां॥ हिरण्यपरिमाणंधने॥ प्रथमो

चिरोपसंपत्तौ॥ कतरकतमौकर्मधारये॥ आर्योब्राह्मणकुमारयोः॥ राजा

च॥ षष्ठीप्रत्येनसि॥ उ॥ क्तेनित्यार्थे॥ ग्रामः शिल्पिनि॥ राजाचप्रशंसा

यां॥ आदिरुदात्तः॥ सप्तमीहारिणौधर्म्येहरणे॥ युक्तेच॥ विभाषाध्यक्षे॥ ५१

पापंच शिल्पिनि॥ गोत्रांतेवासिमाणवब्राह्मणेषु क्षेपे॥ अंगानिमैरेये॥

भक्ताख्यास्तदर्थेषु॥ गोबिडालसिंहसैंधवेषूपमाने॥ अकेजीविकार्थे॥

प्राचां क्रीडायां॥ अणि नियुक्ते॥ शिल्पिनि चाकृञः॥ संज्ञायां च॥ गोतंतियवं
पाले॥ णिनि॥ उपमानं शब्दार्थप्रकृतावेव॥ ४॥ युक्तारोह्यादयश्च॥ दीर्घ
काशतुषभ्राष्ट्रवटं जे॥ अंत्यात्पूर्वं बह्वचः॥ ग्रामे निवसंतः॥ घोषादिषु च॥
छात्र्यादयः शालायां॥ प्रस्थे वृद्धमकर्क्यादीनां॥ मालादीनां च॥ अमहन्नवं नग
रे नुदीचां॥ अर्मे चावर्णं द्व्यच् त्र्यच्॥ नभूताधिकसंजीवमद्राश्मकंजलं॥
अंतः॥ सर्वगुणकार्त्स्न्ये॥ संज्ञायां गिरिनिकाययोः॥ कुमार्यां वयसि॥ उद
केकेवले॥ द्विगौ क्रतौ॥ सभायां नपुंसके॥ पुरे प्राचां॥ अरिष्टगौडपूर्वे च॥
॥५॥ न हास्तिनफलकमार्देयाः॥ कुसूलकूपकुंभशालं बिले॥ दिक्छब्दा ग्रा
मजनपदाख्यानचानराटेषु॥ आचार्योपसर्जनश्चांतेवासिनि॥ उत्तरपद

सू॰पा॰६ हृद्धो सर्वंच॥ बङ्ग्रीहौ विश्वं संज्ञायां॥ उद्राश्वेषुषु॥ क्षेपे॥ नदीबंधुनि॥ नि
ष्ठोपसर्गपूर्वमन्यतरस्यां॥ उत्तरपदादिः॥ कर्णो वर्णलक्षणात्॥ संज्ञौपम्य
५२ योश्च॥ कंठपृष्ठग्रीवाजंघंच॥ शृंगमवस्थायांच॥ नञोजरमरमित्रमृताः॥
सोर्मनसी अलोमोषसी॥ क्रत्वादयश्च॥ आद्युदात्तंद्व्यच्छंदसि॥ वीरवी
र्यौच॥ ६॥ कूलतीरतूलमूलशालाक्षसममव्ययीभावे॥ कंसमंथशूर्प
पाय्यकांडंद्विगौ॥ तत्पुरुषेशालायांनपुंसके॥ कंथाच॥ आदिश्चिहणादी
नां॥ चेलखेटकटुककांडंगर्हायां॥ चीरमुपमानं॥ पललसूपशाकंमिश्रे॥ कू
लसूदस्थलकर्षाः संज्ञायां॥ अकर्मधारयेराज्यं॥ वर्ग्यादयश्च॥ पुत्रःपुंभ्यः॥ ५२
नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः॥ चूर्णादीन्यप्राणिषष्ठ्याः॥ षट्चकां

आदी।नि॥ कुंडं वनं॥ प्रकृत्याभगालं॥ शितेर्नित्याबह्वज्बहुव्रीहावभसत्॥ ग
तिकारकोपपदात्कृत्॥ उभेवनस्पत्यादिषुयुगपत्॥ ७॥ देवताद्वंद्वेच॥ नो
त्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमंथिषु॥ अंतः॥ थाथघञ्क्ताजबित्र
काणां॥ सूपमानात्क्तः॥ संज्ञायामनाचितादीनां॥ प्रवृद्धादीनांच॥ कार
काद्दत्तश्रुतयोरेवाऽऽशिषि॥ इत्थंभूतेनकृतमितिच॥ अनोभावकर्मवचनः॥
मन्क्तिन्व्याख्यानशयनाऽऽसनस्थानयाजकादिक्रीताः॥ सप्तम्याःपुण्यं॥
ऊनार्थकलहंतृतीयायाः॥ मिश्रंचानुपसर्गमसंधौ॥ नञोगुणप्रतिषेधेसंपा
द्यर्हहितालमर्थास्तद्धिताः॥ ययतोश्चातदर्थे॥ अच्कावशक्तौ॥ आक्रोशेच॥
संज्ञायां॥ कृत्योकेष्णुच्चार्वादयश्च॥ ८॥ विभाषातृन्नन्नतीक्ष्णशुचिषु॥ बहुव्री

स्.पा.६ हाविदमेतत्तद्धः प्रथमपूरणयोः क्रियागणने॥ संख्यायास्तनः॥ विभाषाछं
दसि॥ संज्ञायां मित्राजिनयोः॥ व्यवायिनोंतरं॥ मुखंस्वांगं॥ नाव्ययदिक्छब्द
५२ गोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः॥ निष्ठोपमानादन्यतरस्यां॥ जातिकालसुखा
५३ दिभ्यो नाच्छादनात्क्तो कृतमितप्रतिपन्नाः॥ वाजाते॥ नञ्सुभ्यां॥ कपिपूर्
वं॥ ह्रस्वांतेंत्यात्पूर्वं॥ बहोर्नञ्वदुत्तरपदभूम्नि॥ नगुणादयोवयवाः॥ उ
पसर्गात्स्वांगंध्रुवमपर्शु॥ वनंसमासे॥ अंतः॥ अंतश्च॥ २॥ ननिविभ्यां॥ प
रेरभितोभाविमंडलं॥ प्रादस्वांगंसंज्ञायां॥ निरुदकादीनिच॥ अभेर्मुखं॥
अपाच्च॥ स्फिगपूतवीणांजोध्वकुक्षिसीरनामनामच॥ अधेरुपरिस्थं॥ अ ५३
नोरप्रधानकनीयसी॥ पुरुषश्चान्वादिष्टः॥ अतेरकृत्पदे॥ नेरनिधाने॥ प्र

तेरंश्वादयस्तत्पुरुषे॥ उपाद्द्व्यजजिनमगोरादयः॥ सोरवक्षेपणे॥ विभाषो
त्पुच्छे॥ द्वित्रिभ्यांपाद्दन्मूर्धसु बहुव्रीहौ॥ सक्थंचाक्रांतात्॥ परादिश्छंदसि
बहुलं॥ १०॥ ॥ बहुव्रीहावारांकागोः सादृक्तेनित्यार्थेयुक्तान हास्तिनकू
लतीरदेवता विभाषानानिव्येकोनविंशतिः॥ ॥इतिषष्ठाध्यायस्यद्वितीयःपा
दः॥ ॥अलुगुत्तरपदे॥ पंचम्याःस्तोकादिभ्यः॥ ओजःसहोंभस्तमसस्तृतीयायाः॥
मनसः संज्ञायां॥ आज्ञायिनिच॥ आत्मनश्चपूरणे॥ वैयाकरणाख्यायांचतु
र्थ्याः॥ परस्यच॥ हलदंतात्सप्तम्याः संज्ञायां॥ कारनाम्निचप्राचांहलादौ॥ म
ध्याद्गुरौ॥ अमूर्धमस्तकात्स्वांगादकामे॥ बंधेचविभाषा॥ तत्पुरुषेकृतिब
हुलं॥ प्रावृट्छरत्कालदिवांजे॥ विभाषावर्षक्षरशरवरात्॥ घकालतनेषु

सू॰पा॰६ कालनाम्नः ॥ शयवासवासिष्वकालात् ॥ नेन्त्सिद्धबध्नातिषु च ॥ स्थे च भाषायां ॥३॥
षष्ठ्या आक्रोशे ॥ पुत्रेन्यतरस्यां ॥ ऋतो विद्यायोनिसंबंधेभ्यः ॥ विभाषा स्वसृपत्योः ॥
 आनङ् ऋतो द्वंद्वे ॥ देवताद्वंद्वे च ॥ ईदग्नेः सोमवरुणयोः ॥ इद्वृद्धौ ॥ दिवो द्यावा ॥ दि
54 वसश्च पृथिव्यां ॥ उषासोषसः ॥ मातरपितरावुदीचां ॥ पितरामातरा च छंदसि ॥ स्त्रि
याः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ॥ तसिला
दिष्वाकृत्वसुचः ॥ क्यङ्मानिनोश्च ॥ न कोपधायाः ॥ संज्ञापूरण्योश्च ॥ वृद्धिनिमि
त्तस्य च तद्धितस्यारक्तविकारे ॥ स्वांगाच्चेतोमानिनि ॥२॥ जातेश्च ॥ पुंवत्कर्मधा
रयजातीयदेशीयेषु ॥ घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योनेकाचो ह्रस्वः ॥ ५४
नद्याः शेषस्यान्यतरस्यां ॥ उगितश्च ॥ आन्महतः समानाधिकरणजातीय

योः॥ द्यष्टनः संख्यायाम बहुव्रीह्यशीत्योः॥ त्रेस्त्रयः॥ विभाषाचत्वारिंशत्प्रभृ
तौ सर्वेषां॥ हृदयस्य हृल्लेखयदण्लासेषु॥ वाशोकष्यञ्रोगेषु॥ पादस्यपदा
ज्यातिगोपहतेषु॥ पद्यत्यतदर्थे॥ हिमकाषिहतिषु च॥ ऋचः शे॥ वाघोषमिश्रश
ब्देषु॥ उदकस्योदः संज्ञायां॥ पेषंवासवाहनधिषु च॥ एकहलादौपूरयितव्ये न्यत
रस्यां॥ मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषु च॥ ३॥ इकोह्रस्वोऽङ्यो गा
लवस्य॥ एक तद्धिते च॥ ङ्याापोः संज्ञाछंदसोर्बहुलं॥ त्वे च॥ इष्टकेषीकामाला
नांचिततूलभारिषु॥ खित्यनव्ययस्य॥ अरुर्द्विषदजंतस्य मुम्॥ इच एकाचो
म्प्रत्ययवच्च॥ वाचंयमपुरंदरौ च॥ कारे सत्यागदस्य॥ श्येनतिलस्यपाते ञे॥
रात्रेः कृति विभाषा॥ नलोपो नञः॥ तस्मान्नुडचि॥ नभ्राण्नपान्नवेदानासत्यान

सू·पा·६ मुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या।। एकादिश्चैकस्य चादुक्।।
नगोप्राणिष्वन्यतरस्यां।। सहस्य सः संज्ञायां।। ग्रंथांतेऽधिके च।। द्वितीये चानुपाख्ये।।
५५ ।।४।। अव्ययीभावे चाकाले।। वोपसर्जनस्य।। प्रकृत्याशिष्यगोवत्सहलेषु।। समान
स्य छंदस्यमूर्द्धप्रभृत्युदर्केषु।। ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानव
र्णवयोवचनबंधुषु।। चरणे ब्रह्मचारिणि।। तीर्थेये।। विभाषोदरे।। दृग्दृशवतुषु।।
इदंकिमोरीश्की।। आसर्वनाम्नः।। विष्वग्देवयोश्च टेरद्र्यंचतावप्रत्यये।। स
मः समि।। तिरसस्तिर्यलोपे।। सहस्य सध्रिः।। सधमादस्थयोश्छंदसि।। द्व्यंतरुप
सर्गेभ्योप ईत्।। ऊदनोर्देशे।। अषष्ठ्यतृतीयास्थस्याऽन्यस्य दुगाशीराशा ५५
स्थास्थितोत्सुकोतिकारकरागछेषु।। अर्थे विभाषा।।५।। कोः कत्तत्पुरुषेचि।।

रथवदयोश्च॥ तृणे च जातौ॥ का पथ्यक्षयोः॥ ईषदर्थे॥ विभाषा पुरुषे॥ कवं चोष्णे॥ पथि च छंदसि॥ पृषोदरादीनि यथोपदिष्टं॥ संख्याविसायपूर्वस्याऽह्नस्याहन्नन्यतरस्यां ङौ॥ ढ्रलोपे पूर्वस्य दीर्घोणः॥ सहिवहोरोदवर्णस्य॥ साढ्ये साढ्वा साढेति निगमे॥ संहितायां॥ कर्णे लक्षणस्याविष्टाष्टपंचमणिभिन्नच्छिन्नछिद्रस्रुवस्वस्तिकस्य॥ नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ॥ वनगिर्योः संज्ञायां कोटरकिंशुलकादीनां॥ वले॥ मतौ बह्वचो नजिरादीनां॥ शरादीनां च॥ ॥६॥ इको वहेपीलोः॥ उपसर्गस्य घञ्यमनुष्ये बहुलं॥ इकः काशे॥ दस्ति॥ अष्टनः संज्ञायां॥ छंदसि च॥ चितेः कपि॥ विश्वस्य वसुराटोः॥ नरे संज्ञायां॥ मित्रे चर्षौ॥ मंत्रे सोमाश्वेंद्रियविश्वदेव्यस्य मतौ॥ ओषधेश्च विभक्तावप्रथमायां॥

सू॰पा॰६ ॠचितुनुघमक्षुतङ्कुत्रोरुष्याणां॥ इकः सुञि॥ द्यचोतस्तिङः॥ निपात
स्य च॥ अन्येषामपि दृश्यते॥ चौ॥ संप्रसारणस्य॥ ७॥ ॥ अलुकृषष्ठ्या जाते
५६ रिको ऽव्ययीभावे कोः कद्दिकोवहए कोनविंशतिः॥ ॥ इति सूत्रपाठे षष्ठाध्याय
५८ स्यततीयः पादः॥ ॥ अंगस्य॥ हलः॥ नामि॥ नति सृ चत सृ॥ छंदस्युभयथा॥
न च॥ नोपधायाः॥ सर्वनामस्थाने चाऽसंबुद्धौ॥ वाषपूर्वस्य निगमे॥ सांत
महतः संयोगस्य॥ अपूतन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तहोतपोतप्रशास्तॄणां॥
इन्हन्पूषार्यम्णांशौ॥ सौ च॥ अत्वसंतस्य चाधातोः॥ अनुनासिकस्यक्वि
झलोः क्ङिति॥ अज्झनगमांसनि॥ तनोतेर्विभाषा॥ क्रमश्च क्त्वि॥ छ्वोः ५६
शूङनुनासिके च॥ ज्वरत्वरस्रिव्यविमवामुपधायाश्च॥ १॥ राल्लोपः॥ अ

सिद्धवदत्राभात्॥ श्नान्नलोपः॥ अनिदितांहल उपधायाः क्ङिति॥ दंशसंजस्वं
जां शपि॥ रंजेश्च॥ घञि च भावकरणयोः॥ स्यदो जवे॥ अवोदैधौद्मप्रश्रथ
हिमश्रथाः॥ नांचेः पूजायां॥ क्ति स्कंदिस्यंदोः॥ जांतनशां विभाषा॥ भंजेश्च चिणि॥
शासइदङ्हलोः॥ शाहौ॥ हंतेर्जः॥ अनुदात्तोपदेशवनतितनोत्यादीनामनुनासि
कलोपो झलि क्ङिति॥ वाल्यपि॥ न क्तिचि दीर्घश्च॥ गमः क्वौ॥ २॥ विड्वनोरनुनासि
कः स्यात्॥ जनसनखनां सञ्झलोः॥ ये विभाषा॥ तनोतेर्यकि॥ सनः क्ति
चि लोपश्चास्यान्यतरस्यां॥ आर्धधातुके॥ भ्रस्जो रोपधयोरमन्यतरस्यां॥
अतो लोपः॥ यस्य हलः॥ क्यस्य विभाषा॥ णेरनिटि॥ निष्ठायां सेटि॥ जनिता
मंत्रे॥ शमिता यज्ञे॥ अयामंतात्वाय्येत्न्विष्णुषु॥ ल्यपि लघुपूर्वात्॥ विभा

सू॰पा॰६ षाप॥ युप्लुवो दीर्घश्छंदसि॥ क्षियः॥ निष्ठायामण्यदर्थे॥३॥ वाक्रोशदैन्ययोः॥
स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट्च॥
५७ दीर्घोयुडचिकृङिति॥ आतोलोप इटि च॥ ईद्यति॥ घुमास्थागापाजहातिसां ह
57 लि॥ एर्लिङि॥ वान्यस्य संयोगादेः॥ न ल्यपि॥ मयतेरिदन्यतरस्यां॥ लुङ्लङ्
लृङ्क्ष्वडुदात्तः॥ आडजादीनां॥ छंदस्यपि दृश्यते॥ न माङ्योगे॥ बहुलं छंद
स्यमाङ्योगेपि॥ इरयोरे॥ अचि श्नुधातुभ्रुवां य्वोरियङुवङौ॥ अभ्यास
स्यासवर्णे॥ स्त्रियाः॥ वाम्शसोः॥४॥ इणोयण्॥ एरनेकाचोसंयोगपू
र्वस्य॥ ओः सुपि॥ वर्षाभ्वश्च॥ न भूसुधियोः॥ छंदस्युभयथा॥ हुश्नुवोः ५७
सार्वधातुके॥ भुवोवुग्लुङ्लिटोः॥ ऊदुपधाया गोहः॥ दोषो णौ॥ वा चि

तविरागे॥ मितांह्रस्वः॥ चिण्णमुलोर्दीर्घोन्यतरस्यां॥ खचिह्रस्वः॥ ह्लादोनि
ष्ठायां॥ छादेर्घेद्व्युपसर्गस्य॥ इस्मन्त्रन्क्विषुच॥ गमहनजनखनघसांलो
पःक्ङित्यनङि॥ तनिपत्योश्छंदसि॥ घसिभसोर्हलिच॥५॥ हुझल्भ्योहेर्धिः॥
श्रुशृणुपॄकृवृभ्यश्छंदसि॥ अङितश्च॥ चिणोलुक्॥ अतोहेः॥ उतश्चप्रत्य
यादसंयोगपूर्वात्॥ लोपश्चास्यान्यतरस्यांम्वोः॥ नित्यंकरोतेः॥ येच॥ अतउ
त्सार्वधातुके॥ श्नसोरल्लोपः॥ श्नाभ्यस्तयोरातः॥ ईहल्यघोः॥ इद्दरिद्रस्य॥ भि
योन्यतरस्यां॥ जहातेश्च॥ आचहौ॥ लोपोयि॥ घ्वसोरेद्धावभ्यासलोपश्च॥
अतएकहल्मध्येनादेशादेर्लिटि॥६॥ थलिचसेटि॥ तॄफलभजत्रपश्च॥ रा
धोहिंसायां॥ वाजॄभ्रमुत्रसां॥ फणांचसप्तानां॥ नशसददवादिगुणानां॥ अ

स्र·पा·६ र्वणस्त्र साव नञः॥ मघवा बहुलं॥ भस्य॥ पादःपत्॥ वसोः संप्रसारणं॥

५८ वाह ऊठ्॥ श्वयुवमघोनामतद्धिते॥ अल्लोपोनः॥ षपूर्वहन्धृतराज्ञामणि॥

58 विभाषा ङिश्योः॥ नसंयोगाद्वमंतात्॥ अचः॥ उद्ईत्॥ आतोधातोः॥ ७॥

मंत्रेष्वाङ्यादेरात्मनः॥ तिविंशतेर्डिति॥ टेः॥ नस्तद्धिते॥ अह्नष्टखोरेव॥ ओर्गु

णः॥ ढेलोपोकद्र्वाः॥ यस्येतिच॥ सूर्यतिष्यागस्त्यमत्स्यानांयउपधायाः॥ ह

लस्तद्धितस्य॥ आपत्यस्य चतद्धितेनाति॥ क्यच्व्योश्च॥ बिल्वकादिभ्यश्छ

स्य लुक्॥ तुरिष्ठेमेयः सु॥ टेः॥ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणांयणादिपरंपू ५८

र्वस्य च गुणः॥ प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृंदारकाणांप्र

स्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृंदाः॥ बहोर्लोपो भू च बहोः॥ इष्ठस्य यिट्च॥

ज्यादादी यसः॥८॥ रऋतोहलादेर्लघोः॥ विभाषर्जोश्छंदसि॥ प्रकृत्यैकाच्॥
इनण्यनपत्ये॥ गाथिविदथिकेशिगणिपणिनश्च॥ संयोगादिश्च॥ अन्॥
येचाभावकर्मणोः॥ आत्माध्वानौखे॥ नमपूर्वोपत्येवर्मणः॥ ब्राह्मोजातौ॥ का
र्मस्ताच्छील्ये॥ औक्षमनपत्ये॥ दांडिनायनहास्तिनायननाथर्वणिकजैह्माशि
नेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि॥ ऋत्व्य
वास्त्व्यवास्त्वमाध्वीहिरण्ययानिछंदसि॥८॥ ॥ अंगस्यराह्लोपोविदूनोर्वाक्रोशेपो
ऽश्लल्भ्यस्थूलस्थविलचसेटिमंत्रेघारऋतःपंचदश॥ ॥ इतिषष्ठाध्यायस्यचतुर्थःपा
दः॥ ॥ इतिषष्ठोध्यायः समाप्तः॥ ॥हरिः ॐ ३॥ ॥ युवोरनाकौ॥ आयनेयीनीयि
यःफढखछघांप्रत्ययादीनां॥ झोंतः॥ अदभ्यस्तात्॥ आत्मनेपदेष्वनतः॥ शी

स्॰पा॰७ ङेरुरू॥ वेत्ते र्विभाषा॥ बहुलं छंदसि॥ अतो भिस ऐस्॥ बहुलं छंदसि॥ नेदम
५९ दसोरकोः॥ टाङ॰सिङ॰सामिनात्स्याः॥ ङे॰र्यः॥ सर्वनाम्नः स्मै॥ ङसिङ्योः स्मात्स्मि
न्नौ॥ पूर्वादिभ्यो नवभ्यो वा॥ जसः शी॥ औङ॰आपः॥ नपुंसकाच्च॥ जश्शसोः
59 शिः॥ ३॥ अष्टाभ्य औश्॥ षड्भ्यो लुक्॥ स्वमोर्नपुंसकात्॥ अतोम्॥ अड्डतरादिभ्यः
पंचभ्यः॥ नेतराच्छंदसि॥ युष्मदस्मङ्भ्यां ङसोऽश्॥ ङे॰प्रथमयोरम्॥ शसो
न॥ भ्यसो भ्यम्॥ पंचम्या अत्॥ एकवचनस्य च॥ साम आकं॥ आत औण
लः॥ तुह्योस्तातङ्ङाशिष्यन्यतरस्यां॥ विदेः शतुर्वसुः॥ समासेनञ्पूर्वे क्त्वो ल्यप्॥ ५९
त्वापि छंदसि॥ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः॥ अमो मश्॥ ४॥
लोपस्त आत्मनेपदेषु॥ ध्वमो ध्वात्॥ यजध्वैनमिति च॥ तस्य तात्॥ तप्तन

त न थ नाश्च ॥ इदंतोमसि ॥ क्त्वोयकु ॥ इष्टी नमितिच ॥ स्ना त्व्यादयश्च ॥ आज्ज
सेरसुक् ॥ अश्व क्षीर वृषलवणानामात्मप्रीतौ क्यचि ॥ आ मिसर्वनाम्नः सुट् ॥
त्रेस्त्रयः ॥ ह्रस्वनद्यापो नुट् ॥ षट् चतुर्भ्यश्च ॥ श्रीग्रामण्योश्छंदसि ॥ गोः पादांते ॥
इदितो नुम् धातोः ॥ शे मुचादीनां ॥ मस्जिनशो र्झलि ॥ ३ ॥ रधिजभोरचि ॥ नेड्य
लिटिरधेः ॥ रभेरशब्लिटोः ॥ लभेश्च ॥ आङो यि ॥ उपात्प्रशंसायां ॥ उपसर्गात्ख
ल्घञोः ॥ न सुदुर्भ्यां केवलाभ्यां ॥ विभाषा चिण्णमुलोः ॥ उगिदचां सर्वनामस्था
नेधातोः ॥ युजेरसमासे ॥ नपुंसकस्य झलचः ॥ इकोचि विभक्तौ ॥ तृतीयादि
षु भाषितपुंस्कंपुंवद्गालवस्य ॥ अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ॥ छंदस्य
पि दृश्यते ॥ ई च द्विवचने ॥ नाभ्यस्ताच्छतुः ॥ वा नपुंसकस्य ॥ आच्छीनद्योर्नु

सू.पा.७ म॥४॥शप्श्यनोर्नित्यं॥ सावनडुहः॥ दृक्स्ववःस्वतवसां छंदसि॥ दिव औत्॥
पथिमथ्यृभुक्षामात्॥ इतोत्सर्वनामस्थाने॥ थोन्थः॥ भस्यटेर्लोपः॥ पुंसोसु
६० ङ्॥ गोतोणित्॥ णलुत्तमोवा॥ सख्युरसंबुद्धौ॥ अनङ्सौ॥ ऋदुशनस्पुरु
60 दंसोनेहसांच॥ तृज्वत्क्रोष्टुः॥ स्त्रियांच॥ विभाषातृतीयादिष्वचि॥ चतुरन
डुहोरामुदात्तः॥ अम्संबुद्धौ॥ ॠत इद्धातोः॥५॥ उपधायाश्च॥ उदोष्ठ्यपूर्वस्य॥
बहुलंछंदसि॥६॥ ॥युवोरष्टाभ्योलोपस्तरधि शप्श्यनोरूपधायास्त्रीणि॥ ॥
॥ ॥इतिसप्तमाध्यायस्यप्रथमःपादः॥ ॥सिचिवृद्धिःपरस्मैपदेषु॥ अतोल्
रांतस्य॥ वदव्रजहलंतस्याचः॥ नेटि॥ ह्म्यंतक्षणश्वसजागृणिश्व्येदितां॥ ६०
ऊर्णोतेर्विभाषा॥ अतोहलादेर्लघोः॥ नेड्वशिकृति॥ तितुत्रतथसिसुसरक

सेषु च॥ एकाच उपदेशेऽनुदात्तात्॥ श्र्युकः किति॥ सनिग्रहगुहोश्च॥ कृसृभृ
वृस्तुद्रुस्रुश्रुवो लिटि॥ श्वीदितो निष्ठायां॥ यस्य विभाषा॥ आदितश्च॥ विभाषा
भावादिकर्मणोः॥ क्षुब्धस्वांतध्वांतलग्नम्लिष्टविरिब्धफांटबाढानि मंथमन
स्तमः सक्ताविस्पष्टस्वरानायासभृशेषु॥ धृषिशसी वैयात्ये॥ दृढस्थूलब
लयोः॥ १॥ प्रभो परिवृढः॥ कृच्छ्रगहनयोः कषः॥ घुषिरविशब्दने॥ अर्देः संनि
विभ्यः॥ अभेश्चाविदूर्ये॥ णेरध्ययने वृत्तं॥ वा दांतशांतपूर्णदस्तस्पष्टछन्न
ज्ञप्ताः॥ रुष्यमत्वरसंघुषास्वनां॥ हृषेर्लोमसु॥ अपचितश्च॥ कुषिरंजोः छंदसि॥ अप
रिह्वृताश्च॥ सोमे ह्वरितः॥ ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविशस्तृ
शंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्य

सू·पा·७ मिती तिच॥ आर्धधातुकस्येड्वलादेः॥ स्नुक्रमोरनात्मनेपदनिमित्ते॥ ग्रहो लि
६१ टि दीर्घः॥ वृतोवा॥ नलिङि॥ सिचि चपरस्मैपदेषु॥ २॥ इट् सनिवा॥ लिङ् सि
चोरात्मनेपदेषु॥ ऋतश्च संयोगादेः॥ स्वरतिसूतिसूयतिधूञूदितोवा॥ रधा
61 दिभ्यश्च॥ निरः कुषः॥ इण्निष्ठायां॥ तीषसहलुभरुषरिषः॥ सनीवंतर्धभ्र
स्जदंभुश्रिस्वृयूर्णुभरज्ञपिसनां॥ क्लिशः क्त्वानिष्ठयोः॥ पूङश्च॥ वसतिक्षुधो
रिट्॥ अंचेः पूजायां॥ लुभो विमोहने॥ जॄव्रश्च्योः क्त्वि॥ उदितोवा॥ सेसि
चि कृतचृतच्छृदतृदनृतः॥ गमेरिट् परस्मैपदेषु॥ न वृद्भ्यश्चतुर्भ्यः॥ तासि ६१
च क्लृपः॥ ३॥ अचस्तास्वत्थल्यनिटो नित्यं॥ उपदेशे त्वतः॥ ऋतो भारद्वाज
स्य॥ बभूथाततंथजगृभ्मववर्थे तिनिगमे॥ विभाषा सृजिदृशोः॥ इडत्यर्त्ति

व्ययतीनां॥ वस्चेकाजाद्धसां॥ विभाषा गमहनविदविशां॥ सनिंससनिवां
सं॥ ऋद्धनोःस्ये॥ अंजेः सिचि॥ स्तुसुधूञ्भ्यः परस्मैपदेषु॥ यमरमनमातां
सक्च॥ स्मिपूङ् रंज्वशांसनि॥ किरश्चपंचभ्यः॥ रुदादिभ्यः सार्वधातुके॥ ईशः
से॥ ईडजनोर्ध्वे च॥ लिङः सलोपो नंत्यस्य॥ अतो येयः॥ ४॥ आतोङितः॥ आ
नेमुक्॥ ईदासः॥ अष्टन आविभक्तौ॥ रायोहलि॥ युष्मदस्मदोरनादेशे॥ द्वितीया
यां च॥ प्रथमायाश्च द्विवचने भाषायां॥ याचि॥ शेषे लोपः॥ मपर्यंतस्य॥ यु
वावौ द्विवचने॥ यूयवयो जसि॥ त्वाहौ सौ॥ तुभ्यमह्यौ ङयि॥ तवममौ ङसि॥
त्वमावेकवचने॥ प्रत्ययोत्तरपदयोश्च॥ त्रिचतुरोस्त्रियां तिसृचतसृ॥ अ
चिरऋतः॥ ५॥ जराया जरसन्यतरस्यां॥ त्यदादीनामः॥ किमः कः॥ कुतिहोः॥

सू·पा·७ क्त्वाति॥ तदोः सस्सावनंत्ययोः॥ अदस औसुलोपश्च॥ इदमो मः॥ दश्च॥ यः सौ॥

६२ इदोऽय् पुंसि॥ अनाप्यकः॥ हलि लोपः॥ मृजेर्वृद्धिः॥ अचो ञ्णिति॥ अत उप

62 धायाः॥ तद्धितेष्वचामादेः॥ किति च॥ ६॥ ॥ सिचिप्रभाविदूसन्यच आतोजरा

याः अष्टादश॥ ॥ इति सप्तमाध्यायस्य द्वितीयः पादः॥ ॥ देविकाशिंशपादित्य

वाड्दीर्घसत्रश्रेयसामात्॥ केकयमित्रयुप्रलयानां यादेरियः॥ नय्वाभ्यां

पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्॥ द्वारादीनां च॥ न्यग्रोधस्य च केवलस्य॥ न

कर्मव्यतिहारे॥ स्वागतादीनां च॥ श्वादेरिञि॥ पदान्तस्यान्यतरस्यां॥ उत्त

रपदस्य॥ अवयवादृतोः॥ सुसर्वार्धाज्जनपदस्य॥ दिशोऽमद्राणां॥ प्राचां ६२

ग्रामनगराणां॥ संख्यायाः संवत्सरसंख्यस्य च॥ वर्षस्याभविष्यति॥ परि

माणांतस्यासंज्ञा शाणयोः॥ जेप्रोष्ठपदानां॥ हृद्भगसिंध्वंते पूर्वपदस्यच॥ अ
नुशतिकादीनांच॥ १॥ देवताद्वंद्वेच॥ नेंद्रस्यपरस्य॥ दीर्घाच्चवरुणस्य॥ प्राचां
नगरांते॥ जंगलधेनुवलजांतस्यविभाषितमुत्तरं॥ अर्धात्परिमाणस्यपूर्वस्य
तुवा॥ नातःपरस्य॥ प्रवाहणस्यढे॥ तत्प्रत्ययस्यच॥ नञःशुचीश्वरक्षेत्रज्ञकु
शलनिपुणानां॥ यथातथयथापुरयोःपर्यायेण॥ हनस्तोचिण्णलोः॥ आतो
युक्चिण्कृतोः॥ नोदात्तोपदेशस्यमांतस्यानाचमेः॥ जनिवध्योश्च॥ अर्त्तिह्री
व्लीरीक्नूयीक्ष्माय्यातांपुङ्णौ॥ शाच्छासाह्वाव्यावेपांयुक्॥ वोविधूनने
जुक्॥ लीलोर्नुग्लुकावन्यतरस्यांस्नेहविपातने॥ भियोहेतुभयेषुक्॥ २॥
स्फायोवः॥ शदेरगतौतः॥ रुहःपोन्यतरस्यां॥ प्रत्ययस्थात्कात्पूर्वस्यातइदा

स्.पा.७ प्यसुपः॥ नयासयोः॥ उदीचामातस्थानेयकपूर्वायाः॥ भस्त्रैषाजाज्ञाद्वास्वान
६३ न्पूर्वाणामपि॥ अभाषितपुंस्काच्च॥ आदाचार्याणां॥ ठस्येकः॥ इसुसुक्तांतात्कः॥
चजोः कुघिण्यतोः॥ न्यंक्वादीनांच॥ होहंतेर्ञ्णिन्नेषु॥ अभ्यासाच्च॥ हेरचङि॥
63 सन्लिटोर्जेः॥ विभाषाचेः॥ नक्वादेः॥ अजिव्रज्योश्च॥३॥ भुजन्युब्जौपाण्युपता
पयोः॥ प्रयाजानुयाजौयज्ञांगे॥ वंचेर्गतौ॥ ओकउचःके॥ ण्यआवश्यके॥ यजया
चरुचप्रवचर्चश्च॥ वचोशब्दसंज्ञायां॥ प्रयोज्यनियोज्यौशक्यार्थे॥ भोज्यं
भक्ष्ये॥ घोर्लोपोलेटिवा॥ ओतः श्यनि॥ क्षस्याचि॥ लुग्वादुहदिहलिहगुहामात्म
नेपदेदंत्ये॥ शमामष्टानांदीर्घः श्यनि॥ ष्ठिवुक्लमुचमांशिति॥ क्रमः परस्मैपदेषु॥ ६३
इषुगमियमांछः॥ पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदांपिबजि

घ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः॥ ज्ञाजनोर्जा॥ प्वादीनां ह्रस्वः॥४॥
मीनातेर्निगमे॥ मिदेर्गुणः॥ जुसि च॥ सार्वधातुकार्धधातुकयोः॥ जाग्रोविचिण्ण
ल्ङित्सु॥ पुगन्तलघूपधस्य च॥ नाभ्यस्तस्याचि पिति सार्वधातुके॥ भूसुवोस्ति
ङि॥ उतो वृद्धिर्लुकि हलि॥ ऊर्णोतेर्विभाषा॥ गुणोऽपृक्ते॥ तृणह इम्॥ ब्रुव ईट्॥ यङो
वा॥ तुरुस्तुशम्यमः सार्वधातुके॥ अस्तिसिचोऽपृक्ते॥ बहुलं छन्दसि॥ रुदश्च पंच
भ्यः॥ अड्गार्ग्यगालवयोः॥ अटः सर्वेषां॥५॥ अतो दीर्घो यञि॥ सुपि च॥ बहु
वचने झल्येत्॥ ओसि च॥ आङि चापः॥ संबुद्धौ च॥ अंबार्थनद्योर्ह्रस्वः॥ ह्रस्वस्य
गुणः॥ जसि च॥ ऋतो ङि सर्वनामस्थानयोः॥ घेर्ङिति॥ आण्नद्याः॥ याडापः॥
सर्वनाम्नः स्याड्ढ्रस्वश्च॥ विभाषा द्वितीयातृतीयाभ्यां॥ ङेराम्नद्याम्नीभ्यः॥

सू॰पा॰७ इदुद्भ्यां ॥ औत् ॥ अच्च घेः ॥ आङो नास्त्रियां ॥ ६ ॥ ॥ देविकादेवतास्फायो भुजे
मीनातेरतोदीर्घो विंशतिः ॥ ॥ इति सप्तमाऽध्यायस्य तृतीयः पादः ॥ ॥ णौ चङ्युपधा
६४ याह्रस्वः ॥ नाग्लोपिशास्वृदितां ॥ भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्यां ॥
64 लोपः पिबतेरीच्चाभ्यासस्य ॥ तिष्ठतेरित् ॥ जिघ्रतेर्वा ॥ उर्ऋत् ॥ नित्यं छंदसि ॥ दयते
र्दिगि लिटि ॥ ऋतश्च संयोगादेर्गुणः ॥ ऋच्छत्यृतां ॥ शृदृप्रां ह्रस्वो वा ॥ केणः ॥ न कपि ॥
आपोन्यतरस्यां ॥ ऋदृशोङि गुणः ॥ अस्यतेस्थुक् ॥ श्वयतेरः ॥ पतः पुम् ॥ वच उ
म् ॥ १ ॥ शीङः सार्वधातुके गुणः ॥ अयङ् यि क्ङिति ॥ उपसर्गाद्ध्रस्व ऊहतेः ॥ एतेर्लि
ङि ॥ अकृत्सार्वधातुकयोर्दीर्घः ॥ च्वौ च ॥ रीङ् ऋतः ॥ रिङ् शयग्लिङ्क्षु ॥ गुणोर्त्ति ६४
संयोगाद्योः ॥ यङि च ॥ ईघ्राध्मोः ॥ अस्य च्वौ ॥ क्यचि च ॥ अशनायोदन्यधना

या बुभुक्षापिपासागर्धेषु॥ नछंदस्यपुत्रस्य॥ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्य
ति॥ अश्वाघस्यात्॥ देवसुम्नयोर्यजुषिकाठके॥ कव्यध्वरपृतनस्यर्चिलोपः॥ द्य
तिस्यतिमास्थामित्तिकिति॥ २॥ शाच्छोरन्यतरस्यां॥ दधातेर्हिः॥ जहातेश्चक्त्वि॥ वि
भाषाछंदसि॥ सुधितवसुधितनेमधितधिष्वधिषीयच॥ दोदद्घोः॥ अचउपस
र्गात्तः॥ अपोभि॥ सस्यार्द्धधातुके॥ तासस्त्योर्लोपः॥ रिच॥ हएति॥ यीवर्णयोर्दी
धीवेव्योः॥ सनिमीमाघुरभलभशकपतपदामचइस्॥ आप्ज्ञप्यृधामीत्॥ दं
भइच्च॥ मुचोकर्मकस्यगुणोवा॥ अत्रलोपोभ्यासस्य॥ ह्रस्वः॥ हलादिःशेषः॥ ३॥
शर्पूर्वाः खयः॥ कुहोश्चुः॥ नकवतेर्यङि॥ कृषेश्छंदसि॥ दाधर्त्तिदर्धर्त्तिदर्धर्षिबो
भूतुतेतिक्तेलर्ष्यापिनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतो

सू॰पा॰७ द्विद्युतत्तरित्रतः सरीसृपतंवरी वृजन्मर्मर्ज्या गनीगंतीतिच॥ उरत्॥ द्युतिस्वा
प्योः संप्रसारणं॥ व्यथोलिटि॥ दीर्घइणःकिति॥ अत आदेः॥ तस्मान्नुड्द्विहलः॥
६५ अश्नोतेश्च॥ भवतेरः॥ ससूवेतिनिगमे॥ निजांत्रयाणां गुणःश्लौ॥ स्त्रोमित्॥
अर्त्तिपिपर्त्योश्च॥ बहुलं छंदसि॥ सन्यतः॥ ओः पुयण्ज्यपरे॥ ४॥ स्रवतिशृ
65 णोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा॥ गुणोयङ्लुकोः॥ दीर्घोकितः॥ नीग्वंचु
स्रंसुध्वंसुभ्रंसुकसपतपदस्कंदां॥ नुगतोनुनासिकांतस्य॥ जपजभदहदशा
भंजपशांच॥ चरफलोश्च॥ उत्परस्यातः॥ तिच॥ रीगृदुपधस्यच॥ रुग्रिकौचलु
कि॥ ऋतश्च॥ सन्वल्लघुनिचङ्परेनग्लोपे॥ दीर्घोलघोः॥ अत्स्मृदृत्वरप्रथ ६५
म्रदस्तृस्पशां॥ विभाषावेष्टिचेष्टयोः॥ ईच्चगणः॥५॥ ॥ णौचङ्युपधाया ह्रस्वः ... छोः शर्पू

र्वाः स्नवति सप्तदश॥ ॥ इति सप्तमाध्यायस्य चतुर्थः पादः॥ ॥ इति सूत्रपाठे सप्तमोऽ
ध्यायः समाप्तः॥ ॥ हरिः ॐ ३॥ ॥ सर्वस्य द्वे॥ तस्य परमाम्रेडितं॥ अनुदात्तं च॥
नित्यवीप्सयोः॥ परेर्वर्जने॥ प्रसमुपोदः पादपूरणे॥ उपर्यध्यधसः सामीप्ये॥
वाक्यादेरामंत्रितस्याऽसूयासंमतिकोपकुत्सनभर्त्सनेषु॥ एकं बहुव्रीहिवत्॥
आबाधे च॥ कर्मधारयवदुत्तरेषु॥ प्रकारे गुणवचनस्य॥ अकृच्छ्रे प्रियसुखयोर
न्यतरस्यां॥ यथास्वे यथायथं॥ द्वंद्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्र
प्रयोगाभिव्यक्तिषु॥ पदस्य॥ पदात्॥ अनुदात्तं सर्वमपादादौ॥ आमंत्रितस्य च॥
युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ॥ ३॥ बहुवचनस्य वस्नसौ॥ तेम
यावेकवचनस्य॥ त्वामौ द्वितीयायाः॥ न चवाहाहैवयुक्ते॥ पश्यार्थैश्चानालोचने॥

स्.पा.८ सपूर्वायाः प्रथमायाविभाषा॥ तिङो गोत्रादीनिकुत्सनाभीक्ष्ण्ययोः॥ तिङ्ङ् तिङः॥
नलुट्॥ निपातैर्यद्यदिहंतकुविन्नेच्चेच्चणकच्चिद्यत्रयुक्तं॥ नहप्रत्यारंभे॥ सत्यंप्र
६६ श्ने॥ अंगाप्रातिलोम्ये॥ हिच॥ छंदस्यनेकमपिसाकांक्षं॥ यावद्यथाभ्यां॥ पूजायां
नानंतरं॥ उपसर्गव्यपेतंच॥ तुपश्यपश्यताहैः पूजायां॥ अहोच॥२॥ शेषेविभा
षा॥ पुराचपरीप्सायां॥ नन्चित्यनुज्ञैषणायां॥ किंक्रियाप्रश्नेनुपसर्गमप्रतिषिद्धं॥
लोपेविभाषा॥ एहिमन्येप्रहासेल्टट्॥ जात्वपूर्वं॥ किंवृत्तंचचिदुत्तरं॥ आहोउता
होचानंतरं॥ शेषेविभाषा॥ गत्यर्थलोटा ल्टण्नचेत्कारकंसर्वान्यत्॥ लोट्च॥ ६६
विभाषितंसोपसर्गमनुत्तमं॥ हंतच॥ आमएकांतरमामंत्रितमनंतिके॥ यद्धितु
परंछंदसि॥ चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः॥ चादिषुच॥ चवायो

गेप्रथमा॥ हेतिक्षियायां॥३॥ अहेतिविनियोगेच॥ चाहलोपएवेत्यवधारणं॥ चा
दिलोपेविभाषा॥ वैवावेतिचछंदसि॥ एकान्याभ्यांसमर्थाभ्यां॥ यद्वृत्तान्नित्यं॥ पू
जनात्पूजितमनुदात्तंकाष्ठादिभ्यः॥ सगतिरपितिङ्॥ कुत्सनेचसुप्यगोत्रादौ॥ गति
र्गतौ॥ तिङिचोदात्तवति॥ आमंत्रितंपूर्वमविद्यमानवत्॥ नामंत्रितेसमानाधिक
रणेसामान्यवचनं॥ विभाषितंविशेषवचनेबहुवचनं॥ ४॥ ॥ सर्वस्यबहुवच
नस्यशेषेहेतिचतुर्दश॥ ॥ इत्यष्टमाध्यायस्यप्रथमः पादः॥ पूर्वत्रासिद्धं॥ न
लोपः सुप्स्वरसंज्ञातुग्विधिषुकृति॥ नमुने॥ उदात्तस्वरितयोर्यणः स्वरितोनुदात्त
स्य॥ एकादेशउदात्तेनोदात्तः॥ स्वरितोवानुदात्तेपदादौ॥ नलोपः प्रातिपदिकांत
स्य॥ नङिसंबुद्ध्योः॥ मादुपधायाश्चमतोर्वोयवादिभ्यः॥ झयः॥ संज्ञायां॥ आसंदी

सू॰पा॰८ वद्दष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती॥ उदन्वानुदधौच॥ राजन्वान्सौरा
ज्ये॥ छंदसीरः॥ अनोनुट्॥ नाद्घस्य॥ कृपोरोलः॥ उपसर्गस्यायतौ॥ ग्रोयङि॥
६७ ॥१॥ अचिविभाषा॥ परेश्चघांकयोः॥ संयोगांतस्यलोपः॥ रात्सस्य॥ धिच॥ झ
67 लोझलि॥ ह्रस्वादंगात्॥ इट ईटि॥ स्कोःसंयोगाद्योरंतेच॥ चोःकुः॥ होढः॥ दादेर्धा
तोर्घः॥ वाद्रुहमुहष्णुहष्णिहां॥ नहोधः॥ आहस्थः॥ व्रश्चभ्रस्जसृजमृजयजराज
भ्राजछशांषः॥ एकाचोबशोभष् झषंतस्यस्ध्वोः॥ दधस्तथोश्च॥ झलांजशों
ते॥ झषस्तथोर्धोधः॥२॥ षढोःकःसि॥ रदाभ्यांनिष्ठातोनःपूर्वस्यचदः॥ संयो ६७
गादेरातोधातोर्यण्वतः॥ ल्वादिभ्यः॥ ओदितश्च॥ क्षियोदीर्घात्॥ श्योस्पर्शे॥
अंचोनपादाने॥ दिवोविजिगीषायां॥ निर्वाणोवाते॥ शुषःकः॥ पचोवः॥ क्षायो

मः॥ प्रस्त्यो न्यतरस्यां॥ अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः॥ नुदविदोंदत्राघ्रा
ह्रीभ्यो न्यतरस्यां॥ नध्याख्यापॄमूर्छिमदां॥ वित्तो भोगप्रत्यययोः॥ भित्तं श
कलं॥ ऋणमाधमर्ण्ये॥३॥ नसत्तनिषत्तानुत्तप्रतूर्त्तसूर्त्तगूर्त्तानि छंदसि॥ क्विन्
प्रत्ययस्य कुः॥ नशेर्वा॥ मो नो धातोः॥ म्वोश्च॥ ससजुषो रुः॥ अवयाः श्वेतवाः पु
रोडाश्च॥ अहन्॥ रोसुपि॥ अम्नरूधरवरित्युभयथा छंदसि॥ भुवश्च महाव्याहृ
तेः॥ वसुस्रंसुध्वंस्वनडुहां दः॥ तिप्यनस्तेः॥ सिपि धातो रुर्वा॥ दश्च॥ र्वोरुपधाया
दीर्घ इकः॥ हलि च॥ उपधायां च॥ न भकुर्छुरां॥ अदसो सेर्दादु दो मः॥४॥ एत ईद्ब
हुवचने॥ वाक्यस्य टेः प्लुत उदात्तः॥ प्रत्यभिवादे शूद्रे॥ दूराद्धूते च॥ हैहेप्रयोगे है
हयोः॥ गुरोरनृतो नंत्यस्याप्येकैकस्य प्राचां॥ ओमभ्यादाने॥ येयज्ञकर्मणि॥ प्र

सू॰पा॰८ णवष्टेः॥ याज्यांतः॥ ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः॥ अग्नीत्प्रेषणे परस्य
६८ च॥ विभाषा पृष्टप्रतिवचने हेः॥ निगृह्यानुयोगे च॥ आम्रेडितं भर्त्सने॥ अं
68 गयुक्तं तिङाकांक्षं॥ विचार्यमाणानां॥ पूर्वं तु भाषायां॥ प्रतिश्रवणे च॥ अनु
दात्तं प्रश्नांताभिपूजितयोः॥ ५॥ चिदिति चोपमार्थे प्रयुज्यमाने॥ उपरिस्विदा
सीदिति च॥ स्वरितमाम्रेडितेसूयासंमतिकोपकुत्सनेषु॥ क्षियाशीःप्रैषे
षु तिङाकांक्षं॥ अनंत्यस्यापि प्रश्नाख्यानयोः॥ प्लुतावैच इदुतौ॥ एचोप्रगृह्य
स्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ॥ तयोर्य्वावचि संहितायां॥ ६॥ ॥ पूर्व
त्राचिषढोर्नसत्तेतईछ्विदित्यष्टौ॥ ॥ इत्यष्टमाध्यायस्य द्वितीयः पादः॥ ॥ ६८
॥ ॥ मतुवसोरु संबुद्धौ छंदसि॥ अत्रानुनासिकः पूर्वस्य तु वा॥ आतोटि नित्यं॥

अनुनासिकात्परोनुस्वारः॥ समः सुटि॥ पुमः खय्यम्परे॥ नश्छव्यप्रशान्॥ उ
भयथर्क्षु॥ दीर्घादटि समानपादे॥ न्हन्ये॥ स्वतवान्पायौ॥ कानाम्रेडिते॥ ढो
ढे लोपः॥ रोरि॥ खरवसानयोर्विसर्जनीयः॥ रोः सुपि॥ भोभगोअघोअपूर्वस्य
योऽशि॥ व्योर्लघुप्रयत्नतरः शाकटायनस्य॥ लोपः शाकल्यस्य॥ ओतो गार्ग्य
स्य॥ १॥ उञि च पदे॥ हलि सर्वेषां॥ मोनुस्वारः॥ नश्चापदांतस्य झलि॥ मोराजि
समः क्वौ॥ हेमपरे वा॥ नपरे नः॥ ङ्णोः कुक्टुक्शरि॥ ङः सि धुट्॥ नश्च॥ शितुक्॥
ङमो ह्रस्वादचि ङमुण्नित्यं॥ मयउञोवो वा॥ विसर्जनीयस्य सः॥ शर्परे विसर्ज
नीयः॥ वा शरि॥ कुप्वोः ꣹क ꣹पौ च॥ सोपदादौ॥ इणः षः॥ नमस्पुरसोर्गत्योः॥ २॥
इदुदुपधस्य चाप्रत्ययस्य॥ तिरसोन्यतरस्यां॥ द्वित्रिश्चतुरिति कृत्वोर्थे॥ इसु

सू॰पा॰८ सोः सामर्थ्ये॥ नित्यं समासेऽनुत्तरपदस्थस्य॥ अतः कृकमिकंसकुंभपात्रकुशा
कर्णीष्वनव्ययस्य॥ अधःशिरसी पदे॥ कस्कादिषु च॥ छंदसि वाऽप्राम्रेडितयोः॥
६९ कः करत्करतिकृधिकृतेष्वनदितेः॥ पंचम्याः परावध्यर्थे॥ पातौ च बहुलं॥ षष्ठ्याः
पतिपुत्रपृष्ठपारपदपयस्पोषेषु॥ इडाया वा॥ अपदांतस्य मूर्धन्यः॥ सहेः साडः
69 सः॥ इण्कोः॥ नुम्विसर्जनीयशर्व्यवायेऽपि॥ आदेशप्रत्यययोः॥ शासिवसिघ
सीनां च॥ ३॥ स्तौतिण्योरेव षण्यभ्यासात्॥ सः स्विदिस्वदिसहीनां च॥ प्राक्सि
तादड्व्यवायेऽपि॥ स्थादिष्वभ्यासेन चाभ्यासस्य॥ उपसर्गात्सुनोतिसुवतिस्यति
स्तौतिस्तोभतिस्थासेनयसेधसिचसंजस्वंजां॥ सदिरप्रतेः॥ स्तन्भेः॥ अवा ६९
च्चालंबनाविदूर्ययोः॥ वेश्च स्वनो भोजने॥ परिनिविभ्यः सेवसितसयसिवु

सह सुट् स्तु स्वंजां॥ सिवादीनां वाड्व्यवायेपि॥ अनुविपर्यभिनिभ्यः स्यंदतेरप्रा
णिषु॥ वेः स्कंदेरनिष्ठायां॥ परेश्च॥ परिस्कंदः प्राच्यभरतेषु॥ स्फुरतिस्फुलत्यो
र्निर्निविभ्यः॥ वेः स्कभ्नातेर्नित्यं॥ इणः षीध्वंलुङ्लिटां धोंगात्॥ विभाषेटः॥ स
मासेंगुलेः संगः॥ ४॥ भीरोः स्थानं॥ अग्नेः स्तुत्स्तोमसोमाः॥ ज्योतिरायुषः स्तोमः॥
मातृपितृभ्यां स्वसा॥ मातुःपितुर्भ्यामन्यतरस्यां॥ अभिनिसः स्तनः शब्दसंज्ञा
यां॥ उपसर्गप्रादुर्भ्यामस्तिर्यच्परः॥ सुविनिर्दुर्भ्यः सुपिसूतिसमाः॥ निनदीभ्यां
स्नातेः कौशले॥ सूत्रंप्रतिष्णातं॥ कपिष्ठलो गोत्रे॥ प्रष्ठोग्रगामिनि॥ वृक्षासन
योर्विष्टरः॥ छंदोनाम्नि च॥ गवियुधिभ्यां स्थिरः॥ विकुशमिपरिभ्यः स्थलं॥ अं
बांबगोभूमिसव्यापद्वित्रिकुशेकुशंक्वंगुमंजिपुंजिपरमेबर्हिर्दिव्यग्निभ्यः स्थः॥

स्.पा.८ सुषामादिषु च ॥ एति संज्ञायामगात् ॥ नक्षत्राद्वा ॥५॥ ह्रस्वात्तादौ तद्धिते ॥ निसस्त
७० पतावनासेवने ॥ युष्मत्तत्ततक्षुष्वंतः पादं ॥ यजुष्येकेषां ॥ स्तुतस्तोमयोश्छंदसि ॥ पूर्व
70 पदात् ॥ सुञः ॥ सनोतेरनः ॥ सहेः पृतनर्ताभ्यां च ॥ नरपर सृपि सृजिस्पृशि स्पृहि
सवनादीनां ॥ सात्पदाद्योः ॥ सिचो यङि ॥ सेधतेर्गतौ ॥ प्रतिस्तब्धनिस्तब्धौ च ॥
सोढः ॥ स्तंभुसिवुसहां चङि ॥ सुनोतेस्स्यसनोः ॥ सदिस्वंज्योः परस्य लिटि ॥ निव्य
भिभ्योऽड्व्यवाये वा छंदसि ॥६॥ ॥ मतुवसो रु ञिचे उउपधस्य स्तौतिण्यो भश्रो
ह्रस्वादेकोन विंशतिः ॥ ॥ इत्यष्टमाऽध्यायस्य तृतीयः पादः ॥ ॥ रषाभ्यां नो णः
समानपदे ॥ अट्कुप्वाङ्नुम्व्यवायेऽपि ॥ पूर्वपदात्संज्ञायामगः ॥ वनं पुरगामि ७०
श्रकासिध्रकासारिकाकोटराग्रेभ्यः ॥ प्रनिरंतःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपी

रक्षाभ्यो संज्ञायामपि॥ विभाषौषधिवनस्पतिभ्यः॥ अह्नोऽदंतात्॥ वाहनमाहि
तात्॥ पानंदेशे॥ वाभावकरणयोः॥ प्रातिपदिकांतनुम्विभक्तिषुच॥ एकाजुत्त
रपदेणः॥ कुमतिच॥ उपसर्गादसमासेपि णोपदेशस्य॥ हिनुमीना॥ आनिलो
ट्॥ नेर्गदनदपतपदघुमास्यातिहंतियातिवातिद्रातिप्सातिवपतिवहतिशाम्यति
चिनोतिदेग्धिषुच॥ शेषेविभाषाकखादावषांतउपदेशे॥ अनितेः॥ अंतः॥
॥१॥ उभौसाभ्यासस्य॥ हंतेरत्पूर्वस्य॥ वमोर्वा॥ अंतरदेशे॥ अयनंच॥ छंदस्य
दवग्रहात्॥ नभ्भ्वधातुस्थोरुषुभ्यः॥ उपसर्गाद्बहुलं॥ कृत्यचः॥ णेर्विभाषा॥
हलश्चेजुपधात्॥ इजादेः सनुमः॥ वानिंसनिक्षनिंदां॥ नभाभूपूकमिगमिप्या
यीवेपां॥ षात्पदांतात्॥ नशेः ष्वांतस्य॥ पदांतस्य॥ पदव्यवायेपि॥ क्षुभ्नादिषु

च॥ स्तोश्चुनाश्चुः॥२॥ ष्टुनाष्टुः॥ नपदांताट्टोरनां॥ तोःषि॥ शात॥ यरोनुनासिके
नुनासिकोवा॥ अचोरहाभ्यांद्वे॥ अनचिच॥ नादिन्याक्रोशेपुत्रस्य॥ शरोचि॥
त्रिप्रभृतिषुशाकटायनस्य॥ सर्वत्रशाकल्यस्य॥ दीर्घादाचार्याणां॥ झलांजशझ
शि॥ अभ्यासेचर्च॥ खरिच॥ वावसाने॥ अणोऽप्रगृह्यस्यानुनासिकः॥ अ
नुस्वारस्ययियिपरसवर्णः॥ वापदांतस्य॥ तोर्लि॥३॥ उदःस्थास्तंभोःपूर्वस्य॥
झयोहोन्यतरस्यां॥ शश्छोटि॥ हलोयमांयमिलोपः॥ झरोझरिसवर्णे॥ उदा
त्तादनुदात्तस्यस्वरितः॥ नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानां॥ अ
अइति॥४॥ ॥ रषाभ्यामुभ्रोष्टुनादस्थाष्टो॥ ॥ इतिचतुर्थाध्यायस्यचतुर्थः
पादः॥ ॥ इतिसूत्रपाठेचतुर्थोऽध्यायः समाप्तः॥ ॥ त्रीणिसूत्रसहस्राणितथा

नवत्रातानिच॥ षण्नवतिच सूत्राणिपाणिनिः कृतवान्त्स्वयं॥ १॥ ॥श्रीर
स्तु॥ ॥ गुणेइत्युपनामक त्र्यंबकस्येदंपुस्तकं॥ ॥श्रीरामजयरामजयजयराम॥

॥इत्यष्टाध्यायीसूत्रपाठः समाप्तः॥

श्लोक
१०००